CC-0. In Public Domain. Digitization by eGangotri

A255

आत्मचिन्तनस्य

पद्कृत्यम्

आत्मचिन्तनलेखकः

कश्चिन् महात्मा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आत्मचिन्तनस्य

पदकृत्यम्

आत्मचिन्तनलेखकः
हृषीकेशवासी पारेगङ्गं
हनुमच्छिलायाः समीपे
गुहायां विराजमानो
महात्मा

पदकृत्यस्य प्रयोक्ता
कश्चिद् जिज्ञासुः

विक्रम संवत्सरः २०४३ मूल्यं श्रद्धा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकः–

नेपालवासी

भक्तगणः

प्रथमं संस्करणम् ५००

मुद्रकः–

नेपाल प्रेस

शुक्रपथ, काठमाडौं

फोन– २२ १० ३२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ

भिद्यते हृदयग्रन्थिः प्रसादाद् यस्य सद्गुरोः ।
आत्मचिन्तनकारं तं प्रणमामि मुहुर्मुहुः ॥

निवेदनम्

आत्मवेदस्य पर्याय आत्मचिन्तनम् । घटे सागर इव अत्र वेदान्तः परिपूर्णः आत्मनः सत्ता, चिद्घनता, अक्षरताः ब्रह्मता, अद्वैतता, निरञ्जनता तथा सनातनता च अत्र प्रदर्शिता । महावाक्याना मवान्तर-वाक्यानां च गूढं रहस्य मत्र प्रकटीकृतम् । गायत्र्याः प्रणवस्य च सारात्मकता प्रदर्शिता । विद्युद्दामेव प्रपञ्चस्य क्षणभंगुरता सूचिता । पुनः विवेकरहितो जनः विपरीत-भावनया एव भवाटव्यां भ्राम्यति इति प्रदर्श्य स्वानुभवरूपा ज़ीवन्मुक्तस्थितिः प्रकटीकृता ।

श्रद्धया आत्मचिन्तन मभ्यस्य आत्मसाक्षात्कारे कृते एव मानवजीवनस्य सार्थकता । एष एव परमो लाभः । अन्यथा महती हानिः । यतः चतुरशीतिलक्षयोनिषु भ्रमण मतीव कष्टतमम् ।

आत्मचिन्तनस्य लेखकः हृषीकेशक्षेत्रे पारेगङ्गं हनुमच्छिलायाः समीपे गुहायां विराजमानः कश्चित् महात्मा । विद्वान् सर्वत्यागी च यः आकारेण इंगितेन गत्या चेष्टया भाषणेन च परमानन्दनिमग्नः अनुमीयते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लेखक-महात्मनः प्रचारकामनाया मसत्या मपि 'गीता गुह्यम्, वदरीशस्तवनम्, आत्मचिन्तनम्, आत्मचिन्तनस्य उपक्रम उपसंहारश्च, इति चत्वारि पुस्तकानि प्रकाशितानि वर्तन्ते ।

यस्य दर्शनेन, सेवया, शिक्षया च परा शान्तिः प्राप्यते तस्य ब्रह्मनिष्ठस्य चरणयोः सादरं प्रणामं करोमिः पुनः मम प्रमादात् मुद्रादोषात् च जातायां च्युतौ क्षमां निवेदयामि ।

अत्र पाठकानां सुबोधाय विशेषतः सन्धिप्रकरणस्य उपेक्षा विहिता ।

यस्य यस्य धनेन एतत् पुस्तकं प्रकाशितं तस्य तस्य धनिकस्य हृदये सुखशान्ति रस्तु इति परमात्मानं प्रार्थये ।

यस्य यस्य लेखक-महाशयस्य ग्रन्थतः अत्र उद्धरणं कृतं तं तं ग्रन्थकारं सादरं नमामि क्षमारूपां भिक्षां च प्रार्थये ।

– कश्चिज् जिज्ञासुः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ

श्रीमंगलमूर्तये नमः   नमः सद्‌गुरुभ्यः

अथ आत्मचिन्तनम्

ॐ नमो ऽ नन्ताय नित्याय निरस्ताध्यस्तधर्मिणे ।
पुरुषाया ऽ प्रमेयाय नमस्ते हेतुहेतवे ।१।

सर्वाश्रयः सकलसर्गमयो ऽ व्ययश्च
सर्वेश्वरः सफलकर्मकलो ऽ क्रियश्च ।
सर्वान्तरः सततशान्तिवहो ऽ वकाशः
जिज्ञास्यते ऽ मृतपदाय परात्परो ज्ञः ।२।

आस्तिके नास्तिके चास्ति सुषुप्ते जागृतेऽपि च ।
स्वभूतो ऽ यं स्वतः सिद्ध आत्मा कै र्नैव मन्यते ।३।
(आत्मा सर्वै र्हि मन्यते)

यतः प्रीताश्च तृप्ताश्च स्वेषु देहेषु जन्तवः ।
प्रेमास्पदं सुसंलक्ष्य आत्मा कै र्नैव मन्यते ।४।
(आत्मा सर्वै र्हि मन्यते)

यस्य भासा विभातीदं भावेऽभावे भवोऽभवः ।
सर्वेषा मेव सर्वस्वम्, आत्मा कै र्नैव मन्यते ।५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(आत्मा सर्वं हि मन्यते)

स्वप्नान् पश्यति सुप्तो वै सुप्तेर्जागर्ति भावित: ।
सुप्तिमात्रं जगद् ध्येतत्, आत्मा साक्षी सदक्षर: ।६।

ज्ञान मज्ञानपर्यन्तं जीवनं मृत्युसंवृतम् ।
स्वप्नवत् सर्वं मस्पष्टम्, आत्मा साक्षी सदक्षर: ।७।

परमो - पात्त - पर्जन्य - विद्युद्-दामा-हि-संभ्रम—
भ्राजमान: प्रपञ्चोऽत्र आत्मा साक्षी सदक्षर: ।८।

एको गतिषु संभिन्न: किंरूप: किल चिन्त्यताम् ।
गुरुयोगात् प्रबुद्ध: स्यात्, आत्मा ब्रह्मोपपद्यते ।९।

संयम्य सर्वतो वृत्ति मिन्द्रियाणि मनो मतिम् ।
योऽवशिष्येत् स्वयंज्योति:, आत्मा ब्रह्मोपपद्यते ।१०।

अमान: स्यात् समान: स्यान् निर्द्वन्द्वोऽसंग एव च ।
निष्काम: सर्वदानन्द आत्मा ब्रह्मोपपद्यते ।११।

निराकारोऽपरिच्छिन्न: शून्यत्वे नैव सारता ।
चिद्घनो निर्गुणो गूढ आत्माऽद्वैतो निरञ्जन: ।१२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अव्यक्तत्वा दचिन्त्यत्वाद् ब्रह्मणि नैव विभ्रमः ।
कूटस्थे तु बहि र्बाह्य आत्माऽद्वैतो निरञ्जनः ।१३।

विशिष्ट इष्टतो मान्यो भक्तापेक्षितविग्रहः ।
निर्विशेषः शिवः शान्त आत्माऽद्वैतो निरञ्जनः ।१४।

वेदानां त्रिपदा सारं तस्या ओंकार उच्यते ।
ओंनामासि त्वमेवेति, आत्मा धर्मः सनातनः ।१५।

मात्राऽवस्था समाख्याता जानन्नेति त्रिधा गतिम् ।
अमात्रो निर्गति स्तुर्य आत्मा धर्मः सनातनः ।१६।

ओमित्युक्त्वा प्रवर्तन्ते निवर्तन्तेऽथ ब्राह्मणाः ।
ओं सर्वं स्वीकरोतीव, आत्मा धर्म. सनातनः ।१७।

स्फुरति विशति संविद् यत्र सकृद् विभातः
विविध-विभव-भावान् नेहते नेति नेति ।
अविदित-विदिताभ्या मन्यताऽनन्य एव
अहमिति-परिपूर्ण प्रत्ययः प्रत्यगात्मा ।१८।

निगम-गदित-तत्वं प्रस्तुतं सत्यसत्यम्,
अमृत मभय मेतद् भाव्यते भाग्यवद्भिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दमयति दमनीयं दक्षिणामूर्तिमौनं
गमयति पद मन्त्यं स्वस्तिमूलं मुमुक्षून् ।१९।

परं स्वं स्वं परं मत्वा मृगवन् मृग्यते मृषा ।
शाखाग्रे लक्ष्यते लीनः, धीरै रभ्युपलभ्यते ।२०।

अस्मिन् बृहति ब्रह्माण्डे लघुरूपोऽह मीदृशः ।
आत्मतत्वे च विज्ञाते लघुरूपोऽय मीदृशः ।२१।

हरिः ॐ तत् सत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ

श्री परमात्मने नमः

अथ आत्मचिन्तनस्य पदकृत्यम्

ॐ नमोऽनन्ताय नित्याय निरस्ताध्यस्तधर्मिणे ।
पुरुषायाऽप्रमेयाय नमस्ते हेतुहेतवे ।।१।

पदकृत्यम्

आदौ ओंकारपदं [1]मङ्गलाचरणाय। ननु नमोऽनन्ताय इत्यादि अपि मङ्गलाचरणात्मक मेव कथयिष्यसि तथासति पुनरुक्ति-दोषः प्रसज्जेत इति चेत् उच्यते, 'स श्लोकःतु ग्रन्थस्य उपक्रम-रूपः। द्वाभ्यां श्लोकाभ्या मनुबन्धचतुष्टय मपि सूच्यते । भक्तेः परां काष्ठा मारूढः साधनचतुष्टयसंपन्न एव अत्र अधिकारी । अथवा मङ्गलाचरणरूपे सत्यपि काचित् हानिः न । अधिकस्य अधिकं फलं भवति । एतादृशे स्थले पुनरुक्तिः भूषणमेव न तु दूषणम् । अथवा २ ओंकारस्य एव व्याख्यान मात्मचिन्तन मित्यपि सूच्यते ।

टीका १ शिष्टाचारानुमितश्रुतिरेव मङ्गलाचरणे प्रमाणम् । ओंकार श्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्यातौ तस्मान् माङ्गलिका बुभौ ।। २ अकारान्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मकारपर्यन्ताः सर्वे वर्णाः ओंकारे सन्ति । सर्वं वाङ्मय मोंकार-रूपम् । माण्डूक्यशांकरभाष्ये दृश्यते, 'यदिदमर्थजात मभिधेय भूतं तस्याभिधानाव्यतिरेकात् अभिधानस्य चोंकाराव्यतिरेकात् ओंकार एवेदं सर्वम् । परंच ब्रह्म अभिधानाभिधेयोपायपूर्वक मेव गम्यते इति ओंकार एव ।' अस्य चतस्रः मात्रा परापश्यन्ती –मध्यमा–वैखरीरूपाः सन्ति । श्रुति–स्मृति–पुराणेषु ओंकारस्य महत्त्वं विशेषतः गीयते ।

पदकृत्यम्

भक्ते रावश्यकताबोधनाय नमः इति । परमात्मा मां वृणोतु इत्याशयेन वा नमस्कारः कृतः । अथवा त्वमर्थव्यञ्ज-नाय नमः पदम् । अन्तवति (विनाशिनि) वस्तुनि अतिव्याप्ति-वारणाय अनन्त इति । अथवा तत्पदार्थः अनन्तः । अथवा को पि परमात्मगुणाना मन्तं नजानाति । अत एव अनन्तः ।

टी. ननु नमस्कारेण तु द्वैतं प्रतिपाद्यते । एकः नमनीयः, द्वितीयः नमस्कारकर्ता इति । तत्तु अद्वैतप्रतिपादकस्य आत्म-चिन्तनस्य विरुद्धम् । अत एव 'निराकारं कथं वन्दे ह्यभिन्नं शिव मव्यय मिति महर्षिदत्तात्रेयः कथयति इति चेत् उच्यते, एतादृशस्य विरोधस्य परिहाराय एव अनन्तादीनि पदानि दत्तानि । अविनाशी तु व्यापकः एकः परमात्मा एव । तथा स-ति कः अपि विरोधः नास्ति । द्वैताग्रहवतां द्वैतभानस्य निरस-नाय एव द्वैताभासः प्रदर्शितः, व्यापकत्वात् इदं त्वम् अहं च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

छुरिकादशांगुलन्यायेन परमात्मा एव। छुरिकाया मुपरिस्थितायामथवा अधः स्थितायां दशांगुलफलं छिद्यते एव।

आश्वलायनो नमस्कारस्य एव यज्ञत्व मुदाहरति, 'यो नमस्य स्वध्वर इति।' 'यत्र हरिः प्राक् नमस्क्रियते तदेव लग्नं सएव शुभमुहूर्त इति' महाभारतम्। नमस्त्वमर्थो विज्ञेयो रामस्तत्पदमुच्यते इति च श्रूयते। व्यापित्वात् नित्यत्वात् सर्वात्मत्वाद् देशतः कालतः वस्तुतः च अपरिच्छिन्नः अनन्त इति शा. भा.। त्रिविधपरिच्छेदशून्यत्व मनन्तत्व मिति मधुसूदनः

पदकृत्यम्

कोशादिषु अनन्तशब्दार्थाः वहवः सन्ति। अतः शेषनागादिषु अतिव्याप्तिवारणाय नित्यपदम्। कालत्रये तिसृषु अवस्थासु च अविच्छिन्नं वस्तु नित्यम्। ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वं नित्यत्व मिति नैयायिकाः। पुनः 'जीवस्तु प्रतिशरीरं भिन्नो विभु र्नित्यश्च इति तेषां मतम् तथा सति जीवस्य अपि नित्यत्वे प्राप्ते अतिव्याप्तिपरिहाराय 'निरस्ताध्यस्तधर्मिणे' इति। निरस्तः रहितः अध्यस्तः अतस्मिन् तद्बुद्धिरूपः भ्रान्तः धर्मः अस्ति इति तस्मै अर्थात् आत्मनि अध्यस्तः धर्मः कदापि नास्ति। अथवा निरस्तः त्यक्तः अध्यस्तः धर्मः येन। तथासति त्यक्तभ्रमः जीवन्मुक्तः गुरुरपि अत्र नमस्क्रियते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

टी. अतिव्याप्तिश्च लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम्। यथा गोः शृङ्गित्वं न लक्षणम् । तथा अत्रापि अनन्तत्व मात्मत्व मिति लक्षणे कृते शेषनागादौ अतिव्याप्तिः भवति । लक्षणं हि अव्याप्त्या अतिव्याप्त्या असंभवरूपेण च दोषत्रयेण रहितं भवति ।

नित्यो नित्याना मिति (श्वे. उ. ६।१३) नित्यो नित्यानां जीवानां मध्ये तन्नित्यत्वेन तेषामपि नित्यत्व मित्यभिप्रायः।' (शा. भा.) अन्योन्यनाशहेतूनि भूतानि एन मात्मानं नाशयितुं नोत्सहन्ते तस्मान्नित्यः । यतो नित्यः घटवत् अनुत्पाद्य इति नीलकण्ठः । नित्योऽयं पूर्वापरकोटिरहितः अतः अनुत्पाद्यः इति मधुसूदनः ।

मीमांसकाः कथयन्ति, यत्र यदध्यासः तद् विवेकाग्रहनिबन्धनो भ्रम इति। शून्यवादिनो बौद्धाः तु. यत्र यदध्यास स्तस्यैव विपरीतधर्मत्वकल्पना माचक्षते । वैशेषिकाः नैयायिकाः च वदन्ति, अन्यत्र अन्यधर्माध्यास इति । श्री शंकराचार्य आदिशति, 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः पुनः अतस्मिन् तद्बुद्धिः अध्यासः' इति च । यथा सर्परहिते रज्जौ सर्पबुद्धिः अध्यासः तथा अहंप्रत्ययरहिते आत्मनि अहं प्रत्ययः अध्यासः । पुनः यथा सर्पे रज्जुबुद्धिः अत्यन्तभयंकरः तथा अनात्मनि देहेन्द्रियप्राणाऽन्तःकरणादौ आत्मबुद्धिः अत्यन्तदुःखाकरः । एतावता विपरीत बुद्धिरूपत्व मध्यास इति बुध्यते । अध्यासो द्विविधः अर्थाध्यासः ज्ञानाध्यासः च । शुक्तौ अध्यस्तं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रजतं व्यावहारिकरजतमिव पूर्वदर्शनजन्यसंस्कारा दुत्पद्यते। तदेव प्रातिभासिकरजतरूपे दृश्यते । अयमेव अर्थाध्यासः । शुक्तौ अध्यस्तं रजतज्ञानं व्यावहारिकरजतस्मृतिज्ञान मिव पूर्वानुभवजन्यसंस्कारा दुत्पन्नम् । यः रजतस्य प्रातिभासिक ज्ञानस्य रूपे अनुभवः भवति । अयमेव ज्ञानाध्यासः । अर्थाध्यासः अपि प्रातीतिक–व्यावहारिक–भेदाद् द्विविधः । कर्तृत्वं भोक्तृत्वं च अध्यस्तत्वात् शुक्तौ दृष्टं रजतमिव मिथ्या । अर्थाध्यासः स्वरूपाध्यास–संसर्गाध्यासरूपेण पुनः द्विविधः कीर्त्यते । केचित्तु अर्थाध्यासस्य षड्विधता मपि वर्णयन्ति ।

पदकृत्यम

नमस्कृतः तादृशः परमात्मा कुत्र वर्तते इति जिज्ञासायाः शान्तये [1]पुरुष इति । पुरि हृदय-गुहायां शेते इति पुरुषशब्दस्य निर्वचनम् । अथवा पुरुषु भूरिषु उत्कर्षशालिषु सत्त्वेषु सीदति इति । पुरूणि फलानि सनोति ददाति इति वा । पुरूणि भुवनानि संहारसमये स्यति अन्तं करोति इति वा । अप्रमेयपदेन सर्वं प्रमेयजातं दृश्यं निरस्यते । प्रत्यक्षादि प्रमाणैः प्रमातु मशक्यः [2]अप्रमेयः । आदरातिशयद्योत नार्थं पुन र्नम इति । आत्मनः परोक्षतानिवारणाय ते इति । प्रकृतिरपि प्रत्यक्षादि प्रमाणैः परिच्छेत्तु मशक्यत्वात् अप्रमेया

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इव वर्तते । अतः तत्र अतिव्याप्तिवारणाय हे³तुहेतवे इति। जगत्कारणत्वात् प्रकृति रपि हेतुः कारणम् । अतः हेतोः प्रकृतेः अपि हेतुः कारणं परमात्मा ।

टी. १ पूर्णत्वात्, पूरणाद् वा सदनाद् वा पुरुष इति (वि. स. शा. भा.) स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति (बृ. उ. २।४।१८)

२ अन्येन हि अन्यत् प्रमीयते असौ तु एक एव अतोऽप्रमेयः इति (शा. भा.) शब्दादिरहितत्वात् न प्रत्यक्षगम्यः, तद्-व्याप्तलिङ्गाभावान् न अनुमानविषयः, निर्भागत्वेन सादृश्या-भावात् न उपमानगम्यः, तद्विना नुपपद्यमानस्याऽसंभवात् न अर्थापत्तिग्राह्यः । नाप्यभावगोचरो भावत्वेन संमतत्वात् । अभावसाक्षित्वाच्च न षष्ठप्रमाणस्य । नापि शास्त्रप्रमाण वेद्यः प्रमाणजन्याऽतिशयाभावात् (वि. स. शा. भा)

३ हेतुर्ना कारणं बीज मित्यमरः । सांख्ये दृश्यते, 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृति रित्यर्थः। मूल प्रकृति रविकृतिः। विश्वस्य कार्यसंघातस्य सा मूलम् इत्यादि। ब्रह्मसूत्रभाष्ये दृश्यते, 'न सांख्यपरिकल्पित मचेतनं प्रधानं जगतः कारणम् । ईक्षितृत्व

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रवणात्' इत्यादि । तस्यापि हेतुः परहेतुहेतुः विष्णुपुराण १।१५।३६)

द्रष्टव्यम्– अधिकारी, विषयः संवन्धः प्रयोजनं चेति अनुबन्धचतुष्टयम् । विवेकः वैराग्यं, शमदमोपरति-तितिक्षा श्रद्धा समाधानरूपाः षट् संपत्तयः, मुमुक्षुता च साधनचतुष्टयम् । एभिः साधनैः युक्त एव अत्र अधिकारी । अतः प्राक् विवेकः अवलम्बनीयः। परया भक्त्या प्रसन्नः परमात्मा विवेकरूपं दूतं प्रेषयति । किं नित्यं किमनित्य मिति विवेकं कर्तुं मानव एव समर्थः । खलु बहुजन्मना मन्ते दुर्लभं मनुष्यजन्म प्राप्यते । अत्रापि पुरुषत्वं तु महतः पुण्यस्य परिणामः । परमात्मनः अनुग्रहं विना आत्मविषये जिज्ञासा अपि न भवति । यदि एतत् त्रितय मधिगतं चेत् अस्माभिः तस्य सदुपयोगः कर्तव्यः। क्षणलवमात्रमपि आयुः सुवर्णमयैः दीनारकोटिभिः अपि न लभ्यते । यदि तत् सर्वं विषयासक्त्या वृथा एव गच्छति चेत् कीदृशी हानिः स्यात् । सर्वं जगत् अनित्यमेव । स्त्री, पुत्रः, गृहं, क्षेत्रं, धनं, शरीर मिन्द्रियाणि, प्राणाः मनः, बुद्धिः चित्त महंकारः च सर्वे अनित्याः । अतः अस्मिन् संघाते कः नित्य इति विवेचनीयः । विवेकचिन्तामणौ गृहीते अज्ञानान्धकारः नश्यति, ईप्सितं फलं च प्राप्यते । घोरसंसाराद् भीतानां विवेक एव शरणम् । संसार-सागरस्य तरणे अन्यः उपायः नास्ति । अनुसन्धाने कृते जाग्रति, स्वप्ने, सुषुप्तौ, समाधौ च विराजमान आत्मा एव नित्यः । यः भूते, वर्तमाने,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भविष्यति च तिष्ठति ।

नमस्कृतस्य परमात्मनः स्वरूपलक्षणं तटस्थलक्षणं च द्वितीय श्लोके प्रदर्श्यते । तदभिन्ने सति बोधकं स्वरूपमेव लक्षणं स्वरूपलक्षणं यथा अत्र ज्ञ इति स्वरूपलक्षणम् । यावत् लक्ष्यकाल मनवस्थितत्वे सति यद् व्यावर्तकं तत् तटस्थलक्षणं यथा सर्वाश्रय इत्यादि । महाप्रलये तु सर्वस्य अभावात् सर्वाश्रयत्वं न संभवति ।

(२)

सर्वाश्रयः सकलसर्गमयो ऽ व्ययश्च
सर्वेश्वरः सफलकर्मकलो ऽ क्रियश्च ।
सर्वान्तरः सततशान्तिवहो ऽ वकाशो
जिज्ञास्यते ऽ मृतपदाय परात् परो ज्ञः ।२।

पदकृत्यम्

परमात्मनः परिच्छिन्नतानिवारणाय सर्वाश्रयपदम् । यथा चतुर्णां पृथिव्यादीनां तत्त्वानामाश्रय आकाशः तथा अव्यक्तपर्यन्तानां सर्वेषा मधिष्ठानत्वात् परमात्मासर्वाश्रयः । सर्वाश्रयत्व माकाशे पृथिव्यां च वर्तते इति केषांचित् मतम् । अतः तत्र अतिव्याप्तिवारणाय पुनः जलरूपात् समुद्रात् तरङ्गस्य अभेदवत् प्रपञ्चस्य अपि परमात्मरूपता-प्रतिपादनाय सकल सर्गमय इति । सर्गमयत्वे सति परमात्मनि नश्वरता संभाव्यते अतः अव्ययपदेन तन्निवारणं क्रियते । न

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

व्येति विकारं न प्राप्नोति इति [३]अव्ययः । परमात्मनि अल्पशक्तितत्वनिवारणाय [३]सर्वेश्वरपदम् । सृष्टि स्थितिलय समर्थ ईश्वरः । केचन कुतार्किकाः परमात्मनि दोषसारोपयन्तः कथयन्ति, 'दरिद्रं रोगिणं दुःखभाजं च प्राणिनं रचयन् युष्माक मीश्वरः सृष्टिकलायां सफलो न इति ।' तादृशदोषारोपणपरिहाराय सफलकर्मकल इति । सृष्टि स्थितिप्रलयादिषु सफल इति । सर्वैः प्राणिभिः कृतानां पापपुण्यादीनां नानाविधानां कर्मणां समुचितं फलं ददाति सः । सफलकर्मकलत्वे तु क्रियायाः कर्ता भवति । कर्तृत्वादिकं तु आविद्यक मेव । तथा सति परमात्मा अपि जीव इव संसारी स्यात् इत्यादि बितण्डाया निवारणाय अक्रियपदम्। यथा सूर्यस्य प्रकाशं प्राप्य प्राणिनःकर्म कुर्वन्ति सूर्यस्तु किमपि नकरोति । तथा परमात्मनः सांनिध्यात् अहंकारादयः कर्म कुर्वन्ति । परमात्मा तु कामपि क्रियां न करोति । व्यापको निरवयवः स कथं क्रियां कुर्यात् ?

टी. १ ननु सर्वाश्रयत्वं पुनः सकलसर्गमयत्वं च विरुद्धं कथं कथितम् ? आश्रयः तु आश्रितात् भिन्नो भवति इति चेत् उच्यते, ब्रह्मै वेदं सर्व मिति (मु. उ. २।२।११) श्रूयते च, 'यद् यत् पश्यति चक्षुर्भ्यां तत्तदात्मेति भावयेत् । दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत्' यथा च मृगतृष्णिकोदकादीना मूषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेणानुपाख्यत्वात् एव मस्य भोग्यभोक्त्रादिप्रपञ्चजात स्य ब्रह्मव्यतिरेकेण अभाव इति द्रष्टव्यम् ।' इति (ब्र. सू. शा. भा.)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सकलमिदमहं च वासुदेवः (वि. पु. ३।७।१२) इत्यादि श्रुति स्मृति पुराणादिभिः कथ्यते, 'रज्वां सर्पभ्रान्तिरिव सर्वं जगत् अविद्यामात्र मिति। अत्र यद् यद् दृश्यते तत्सर्व मात्मरूप मिति उपासनाऽपि सूच्यते ।

२ उपचयापचयौ न याति इति अव्ययः । 'एतत् सदाख्यं ब्रह्म स्वेन रूपेण न व्यभिचरति निरवयवत्वात् देहादिवत् इति (शा. भा.) 'न हि निरवयवस्य स्वावयवापचयरूपः व्ययः संभवति' इति आनन्दगिरिः) सर्वविकारशून्यस्य विनाशो नास्ति इति नीलकण्ठः

३. एष सर्वेश्वर इति (मा. उ. १।६) 'एष हि स्वरूपा वस्थः सर्वेश्वरः साधिदैविकस्य भेदजातस्य सर्वस्येशिता' इति (शा. भा.) स्वरूपावस्थत्वं नाम उपाधिप्राधान्य मवधूय चैतन्यप्राधान्यम् । 'नैयायिकास्तु ताटस्थ्यमीश्वरस्याऽवतिष्ठन्ते तदयुक्तं पत्युरसामञ्जस्यादिति न्यायविरोधात्' इति आनन्द गिरिः ।

पदकृत्यम्

सर्वान्तरपदेन 'तादृशः परमात्मा कुत्र तिष्ठति ?' इति शंकायाः समाधानं विधीयते । 'आन्तरत्वे अपि पिशाच-सदृशं मन इव अशान्ति मानयति किम्' इति संशयस्य परिहाराय तथा सांख्यस्मृतिकल्पितस्य प्रधानस्य अपि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रूपादिहीनतया सर्वविकारकारणत्वात् च सर्वान्तरत्वे प्राप्ते तत्र अतिव्याप्तिवारणाय सततशान्तिवह इति । अखण्डशान्तिरूपत्वे अपि सप्रतिबन्धश्चेत् तदनुभवः सुदुर्लभः स्यात् इति प्रतिवादनिराकरणाय १ अवकाशपदम्। व्यापकत्वात् आकाशवत् प्रतिबन्धरहितः परमात्मा । आत्मचिन्तनफलनिर्देशनममृतपदेन विधीयते । प्रयोजनं विना तु कोऽपि कस्मिँश्चित् कार्ये नप्रवर्तते । अमृतपदं मोक्ष एव । 'विश्वस्य कार्यसंघातस्य मूलँ प्रकृतिरेव नत्वस्य मूलान्तर मस्ति अनवस्थाप्रसङ्गात्' इत्यादि सांख्यमतस्य खण्डनाय २ परात् पर इति । परात् प्रकृतेः पर इति । प्रकृतेः जडत्वात् तत्कारणमपि जडरूपं भवेत् इत्यादि वितण्डाया अपसारणाय ३ ज्ञ इति । ज्ञातृ–ज्ञान–ज्ञेयरूपत्रिपुटीरहितं ज्ञानं ज्ञः, ज्ञप्तिः, चिद्घनः शुद्धचैतन्यं, चितिः सत्तासामान्यं संविन्मात्रम् इत्यादिपदैः बोध्यते ।

टी.१,'ॐ कं ब्रह्म खं ब्रह्म (छा. उ. ४।१०।१४) इत्यस्य अर्थः अत्र सूच्यते । कं सुखरूपं ब्रह्म इति । पुनः अवकाश शब्देन चिदाकाशरूपं ब्रह्म इति । (वि. पु. १।१४।३२) अवकाश मशेषाणां भूतानां यः प्रयच्छति । अनन्तमूर्तिमान् शुद्ध स्तस्मै व्योमात्मने नमः ।

२ परात् परं पुरुष मुपैति (मु. उ. ३।२।८) तथा (कैवल्य, उ. १।३।) अस्य शा. भा., 'परादक्षरात् (अव्या-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृतात्) पूर्वोक्तात् परं दिव्यं पुरुषं यथोक्तलक्षण मुपैति।' 'अव्यक्ताद् व्यक्त मुत्पन्न मव्यक्तात् प्रकृतेः परः' इति अनुस्मृतिः।

३ 'ज्ञः कालकारो गुणी सर्वविद् यः (श्वे. उ. ६।१६) जानाति इति ज्ञः। सर्वस्य आत्मा सर्वस्य योनिः सर्वज्ञ श्चैतन्यज्योति रित्यर्थः। 'ज्ञातृज्ञानज्ञेयविहीनोऽपि सदा ज्ञः' इति हरिमीडेस्तोत्रम्।

८. यथार्थ मीश्वर–स्वरूपं बोद्धुं प्राक् वैराग्यस्य आवश्यकता भवति। देहपुत्रकलत्रादीनां रागेण अन्धः सन्मार्गं न पश्यति। रागद्वेषरूपौ सर्पौ यस्य हृदये भवतः तस्य अत्यन्त सन्निहितः अपि ईश्वरः अतीव दूरतमः भवति। इन्द्रस्य पद मपि काकविष्ठावत् उपेक्षणीयम्। पुनः ईश्वर दर्शनस्य अभिलाषिभिः षट् संपत्तयः अर्जनीयाः। मनसः शमः, इन्द्रियाणां दमः, विषयेभ्यः उपरतिः; सहनशीलता, श्रद्धा समाधान मर्थात् मनस एकाग्रता (मनस आत्मनि स्थितिः) च षट् संपत्तयः। लोके अपि साधनं विना साध्यं नसिध्यंति चेत् परमार्थे किमु वक्तव्यम् ? अतः प्रयत्नेन साधनं संग्रहीतव्यम्। ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति इति भगवान् कृष्ण आदिशति। दारुमयानि यन्त्राणि यथा लौकिकः सूत्रधारः प्रच्छन्नतया भ्रामयति तथा ईश्वरः अपि सर्वाणि भूतानि भ्रामयति। खलु अशुद्धेन चित्तेन राहुणा ईश्वरसूर्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आच्छाद्यते । अतः चित्तशुद्धिः एव ईश्वर–मन्दिरस्य मुख्यं द्वारम् । चतुर्षु साधनेषु संगृहीतेषु एव चित्तशुद्धिः भवति । सर्वव्यापकः अपि ईश्वरः अतीव शुद्धे चित्ते आविर्भवति । नैयायिकाः तु 'समवायसंवन्धेन नित्यज्ञानवान् ईश्वरः' इति कथयन्ति । गुणविशिष्टमात्मान्तर मीश्वरः इति श्रूयते उदयनाचार्येण ईश्वर–विषये बहवः हेतवः प्रदर्शिता वर्त्तन्ते । पातञ्जलाः कथयन्ति, 'क्लेशकर्मविपाकाशयै रपरामृष्टः पुरुषविशेष ईश्वरः' इति । सत्वात्मिकायां मायायां प्रतिबिम्बितं ब्रह्मचैतन्य मीश्वरः सः सर्वज्ञः सृष्टिस्थितिकारकः च इति वेदान्तिनः । अज्ञानोपहितः बिम्बस्थानीय एव ईश्वर इत्यपि केचित् विवरणकारादयः कथयन्ति ।

सांप्रतं त्रिभिः श्लोकैः आत्मनः सत्ता प्रदर्श्यते । किन्तु आत्मसत्तां ज्ञातु मनुभवितुं च मनुष्या एव शक्नुवन्ति अत एव मनुष्ययोनिः सर्वोत्तमा तथा देवानामपि स्पृहणीया संजाता ।

(३)

आस्तिके नास्तिके चास्ति सुषुप्ते जागृतेऽपि च ।
स्वभूतोऽयं स्वतः सिद्ध आत्मा कै नैवमन्यते ।।
(आत्मा सर्वैं र्हि मन्यते)

पदकृत्यम्

ईश्वरास्तित्वं वेदप्रामाण्यं च स्वीकुर्वतः मनुष्यस्य ज्ञापनाय आस्तिके इति । ईश्वरस्य नास्तित्वं, परलोकस्य तथा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अदृष्टस्य अभावं पुनः वेदस्य च अप्रामाण्यं कथयतः मनुष्यस्य बोधनाय नास्तिके इति। पृथिव्यां द्विविधा मनुष्याः सन्ति आस्तिकाः नास्तिकाः च । अत आस्तिकनास्तिकपदाभ्यां मनुष्यमात्रस्य ग्रहणं भवति । अस्ति परलोक इति मति र्यस्य इति ठक् प्रत्यये आस्तिक इति सिध्यति। अविद्यागोचराया मविद्यावृत्त्यवस्थायां प्राप्तस्य मनुष्यस्य बोधनाय तथा जागृतादौ जने अतिव्याप्तिवारणाय च 'सुषुप्ते' इति। इन्द्रिय-जन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्थायां प्राप्तस्य मनुष्यस्य ग्रहणाय तथा सुषुप्तमूर्च्छितादिनिवारणाय 'जागृते' पदम् । द्वाभ्यामवस्थाभ्यां स्वप्नमूर्च्छादय श्च उपलक्ष्यन्ते। अर्धसंपत्ति र्मुग्धता इति कथ्यते च। अन्यतानिवाररणाय स्व-भूत इति। अन्यः जनः अस्ति वा नास्ति इति कथयितुं शक्यते। आत्मा तु स्वस्य एव स्वरूपम् । अतः अहं न अस्मि इति कोऽपि नकथयति। अह मस्मि वा न इति संशयः अपि कदाचित् न भवति । 'अहमस्मि' इति अनुभव एव सदा भवति। परप्रकाश्यतानिवारणपूर्वक मात्मनः स्वप्रकाशतायाः तथा प्रत्यक्षादिभिः लौकिकैः प्रमाणैः आत्मा बोद्धुं नशक्यते इति सिद्धान्तस्य च निरूपणं स्वतः सिद्धपदेन क्रियते । पर प्रकाश्यत्वे तु कार्यत्व मनित्यत्वं परिच्छिन्नता च प्रतिभाति। किन्तु सर्वकारणे अपरिच्छिन्ने स्वप्रकाशे आत्मनि कस्य अपि मनुष्यस्य शंका नभवति । असति अनात्मनि अतिप्रसक्ति निवारणाय तथा सर्वासु व्यावृत्तासु अवस्थासु सातत्येन अनुवर्त-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मानताबोधनाय च आत्मा इति । सर्वे मनुष्या आत्मनः अस्तित्वं स्वीकुर्वन्ति इति प्रतिपादनाय कै नैव मन्यते इति पदानि ।

टी. "नहि आत्मा नाम कस्यचि दप्रसिद्धो भवति । शास्त्रं त्वन्त्यं प्रमाण मतद्धर्मारोपणमात्रनिवर्तकत्वेन प्रमाणत्व मात्मनि प्रतिपद्यते न तु अज्ञातार्थज्ञापकत्वेन' इति (शा. भा.) आत्मनः स्वतः सिद्धत्वात् आगमेन आत्मा न परिच्छिद्यते न च प्रत्यक्षादिना । 'स्वतः सिद्धभावा दिति' दशश्लोकी । प्रमाणमप्रमाणं च प्रमाभास स्तथैव च । यत्प्रसादात् प्रसिद्ध्यन्ति तदसँभावना कुतः ।। इति श्रूयते च । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भाव स्तस्मा दात्मेति कीर्त्यते इति (लिंग. पु. १।७०।६६)

चत्वारि भूतान्येव इति चार्वाकाः । क्षणिकं विज्ञानमिति सुगताः । शून्यमिति माध्यमिकाः । देहेन्द्रियातिरिक्तो देहपरिमाण इति दिगम्बराः । कर्ता भोक्ता जडो विभुरिति वैशेषिक तार्किक प्रभाकराः । जडो बोधात्मक इति भाट्टाः । भोक्ता केवल बोधात्मक इति सांख्यादयः ।

द्र. आत्मचिन्तकेन प्राक् आत्मनः अस्तित्वं स्वीकर्तव्यम् । अत्यन्तसन्निधौ स एव वर्तते तथापि अनभिज्ञानां कृते अत्यन्तदूरे । सः अन्तः पुनः बहिरपि विराजते । तस्य रूपमाकारः नास्ति । स खलु नेत्रस्य नेत्रं मनसः च मनः । येन विविधानि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुरशीतिलक्षसंख्याकानि शरीर यन्त्राणि रचितानि । तादृशः शक्तिसंपन्नः कः स्यात् ? जीवा एतादृश मेक मपि यन्त्रं रचयितुं न शक्नुवन्ति । नेत्रं कथं पश्यति, कर्णः कथं शृणोति, प्राणापानौ कः चालयते ? रक्तसंचारः कथं भवति ? इत्यादि विचिन्त्यताम् । इत्थं शरीरयन्त्रस्य अनुसन्धाने कृते सर्वज्ञं सर्व-शक्तिमन्तं परमात्मानं विना एतादृशं कार्यं नसिध्यति इति स्वतः वुध्यते । इत्थं सर्वं भूगोलं तथा खगोलं प्रति च दृष्टिः दीयताम् । आकाशः तारकादयश्च केन सृष्टाः ? तासां गति-विषये प्रबन्धः केन कृतः । तासां गणनां कर्तुं कः शक्नोति ? तासां गतिविषमतायां जातायां कीदृशी हानिः स्यात् ? 'यत् इन्द्रियगोचरं तत् एव सत्' इति कथन मनुचितम् । नैयायिका वैज्ञानिकाः च परमाणोः सत्तां स्वीकुर्वन्ति । आत्मा तु परमाणोः अपि अतीव सूक्ष्मतमः अतः स तु अत्यन्तसूक्ष्मया एकाग्रया बुद्ध्या एव ज्ञातुं शक्यते । पुनः 'यः अहं मशृणवम् स एवाहं पश्यामि इति अहमालम्बनस्य प्रत्यभिज्ञानं सर्वेभ्यः भवति । अतः बुद्धेः प्रकाशकः शुद्धचैतन्यरूपः आत्मा अस्ति इति निश्चयः कर्तव्यः । तत्वज्ञानां महर्षीणां वचने विश्वासः विधेयः। जाग्रत्प्रपञ्चः स्वप्ने न भवति । जाग्रतः तथा स्वप्नस्य च प्रपञ्चः सुषुप्तौ न भवति । प्रकाशकः अनुस्यूतः आत्मा तु सर्वासु अवस्थासु विराजते । मनसि नानाविधा वृत्तय आग-च्छन्ति गच्छन्ति च । सदास्थायी किन्तु वृत्तीनां प्रकाशक आत्मा अनुसन्धाने कृते अभिव्यक्तः भवति । अस्माकं स एव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यथार्थ स्वरूपम्। घटाकाशमठाकाशौ इव आत्मपरमात्मानौ शुद्ध-चैतन्यरूपतया अभिन्नौ। अस्तीत्येवोपलब्धव्य इति कठ श्रुतिः।

मनुष्या एव न किन्तु सर्वे प्राणिन आत्मनः सत्तां स्वीकुर्वन्ति इति अत्र प्रदर्श्यते।

(४)

यतः प्रीताश्च तृप्ताश्च स्वेषु देहेषु जन्तवः।
प्रेमास्पदं सुसंलक्ष्य आत्मा कं नैव मन्यते ॥
(आत्मा सर्वैर्हि मन्यते)

पदकृत्यम्

पूर्व मुल्लिखितस्य आत्मनः ग्रहणाय 'यतः' इति। सर्वे जन्तवः स्वे स्वे देहे प्रीयन्ते इति 'प्रीताः' पदम्, तृप्यन्ति इति 'तृप्ताः' पदम्। अनुसन्धाने कृते सर्वे जन्तवः स्वं स्वं शरीरं रक्षितुं यतन्ते इति ज्ञायते एव। स्व-स्व-भक्ष्यप्राप्तौ ते हृष्यन्ति तृप्यन्ति च। दण्डोद्यतकरं पुरुषं विलोक्य गोप्रभृतयः अपि पलायन्ते पुनः हरितं तृणं दृष्ट्वा अभिमुखीभवन्ति। तद् भक्षयित्वा तृप्यन्ति च। येन केनापि उपायेन स्वकीयं शरीरं रक्षितुं जन्तवः प्रयतमाना दृश्यन्ते। यदि चैतन्यरूपः आत्मा अभ्यन्तरे न स्यात् तदा प्रीतिः तृप्तिः च कथं भवेत्। चुंबकेन लौहमिव आत्मसत्तया एव देहादयः प्रचलन्ति। सर्वेषां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चराणां प्राणिनां ग्रहणाय जन्तव इति । आत्मा आनन्दघन इति बोधनाय [2]प्रेमास्पद पदम् । जन्तवः अपि आनन्दाय एव स्पृहयन्ति न दुःखाय । आनन्दे एव सर्वेषां प्राणिनां प्रेम भवति। इन्द्रियागोचरं वस्तु नास्ति इति दुराग्रहवतां नास्तिकानां वितण्डाया निराकरणाय सुसंलक्ष्य इति । इन्द्रियजन्यं विषयज्ञान-मेव यथार्थानुभवः प्रत्यक्ष मिति चारुवाचः कथयन्ति तर्हि मेघाच्छन्ने नभोमण्डले सूर्यः इन्द्रियगोचरो न भवति। तदा सूर्यः नास्ति इति कथनं किं समुचितम् ? इन्द्रियाऽगोचरस्य परमाणोः सत्ता कथं स्वीक्रियते तैः ? विवेकादिभिः इन्द्रियाणि सम्यक् संयम्य अनुसन्धाने कृते आत्मा सुष्ठु संलक्ष्यते एव ।

टी. १ 'को ह्येवान्यात्' (तै. उ. २।७) इत्यादेः शांकरभाष्ये दृश्यते, 'तद् यदि आकाशे परमे व्योम्नि गुहायाँ निहित आनन्दो न स्यान्न भवेत् को ह्येव लोके अपानचेष्टां प्राणनं वा कुर्यात् तस्मा दस्ति तद् ब्रह्म । स एव आत्मानन्द-रूपोऽविद्यया परिच्छिन्नो विभाव्यते प्राणिभिः इत्यर्थः

२. 'आत्मनस्तु कामाय सर्वं प्रियं भवति' (बृ. उ. २।४।५।) अस्य शा. भा; 'आत्मैव प्रियं नान्यत् ।...तस्मा दात्मप्रीतिसाधनत्वात् गौणी अन्यत्र प्रीतिः । आत्मन्येव मुख्या' वस्तुत आत्मनि एव प्रीतिः भवति । पत्नी मम अनुकूल माचरिष्यति इति पतिः स्वार्थत एव पत्न्यै स्पृहयति । तथैव पत्नी पतिं प्रति प्रीतिं करोति । वार्धक्ये मां रक्षिष्यति इति पिता पुत्रे स्नेह माचरति । आत्मानं मत्वा एव शरीरे प्रीतिः भवति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हस्तपादादिषु कस्मिँश्चित् अङ्गे विकृते जाते चिकित्सकद्वारा छेदयन्ति रोगिणः। अतः आत्मा प्रेमाश्रयः।

८. यथा गौरवर्णस्य प्रतिबिम्ब मादर्शे गौरमेव दृश्यते तथा बुद्धिवृत्तौ शान्ताया मात्मनः प्रतिबिम्बं सुखरूपमेव अनुभूयते जनैः। बुद्धिवृत्तेः लयात् सुषुप्तौ तामसं सुख मनुभूयते सुषुप्तैः। विषयप्राप्तौ क्षणं बुद्धिवृत्तौ विरतायां राजसं प्रतिबिम्बसुखं प्राप्यते भोगिभिः। ध्यानयोगादिना बुद्धिवृत्तौ निरुद्धायां सात्विकं प्रतिबिम्ब सुख मनुभूयते योगिभिः। पुनः बुद्धिवृत्तौ विनष्टायां सनातनं बिम्बसुख मनुभूयते ज्ञानिभिः। वस्तुतः सर्वे प्राणिनः सुखकामाः किन्तु सुखमार्गं चित्तनिरोधरूपं परित्यज्य नानाविधविषयचिन्तनरूपे कुमार्गे प्रचलन्ति। अतः सततं केवलं दुःखमेव प्राप्नुवन्ति। सर्वे विषया दुःखरूपाः। विषये कुत्रापि सुखं नास्ति। विषयप्राप्तौ यत् सुख मनुभूयते तदपि आत्मसुखस्य प्रतिबिम्ब मेव। प्रतिकूलात् पुत्रात्, परपुरुषासक्तायाः भार्यायाः सुखं न भवति। मिष्टान्ने अपि परिमाणा दधिके भुक्ते अमिष्टमिव भवति। शतमोदकभोजने कृते तु दुःख मनुभूयते। अतः विषये सुखस्य अभावात् सुखेच्छुभिः अखण्डसुखरूपस्य आत्मनः चिन्तन मेव करणीयम्।

चर मचरं च जगत् अनुस्यूतया आत्मसत्तया एव विभात मिति प्रदर्श्यते अत्र।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(५)

यस्य भासा विभातीदं भावेऽभावे भवोऽभवः ।
सर्वेषा मेव सर्वस्वम्, आत्मा कै नैव मन्यते ।।

(आत्मा सर्वैं र्हि मन्यते)

पदकृत्यम्

पूर्वोक्तस्य आत्मनः ग्रहणाय पुनः कस्य भासा चराचरं प्रतिभाति इति प्रश्नस्य समाधानाय यस्य इति । चैतन्यरूपया दीप्त्या भाति नतु भौतिकतेजसा इति 'भासा' पदेन व्यज्यते । यथा जल मग्निसंयोगात् अग्निंदहन्त मनुदहति नतु स्वयम् तथा आत्मन एव दीप्त्या इदं जगत् असत् अपि प्रतिभाति इति बोधनाय 'विभाति' पदम् । भ्रान्त्या दृष्टस्य चराचरस्य ग्रहणाय इद मिति । आत्मसत्तायां सत्यामेव चराचरं प्रतिभाति इति व्यञ्जनाय भावे भव इति पदद्वयम् । आत्मचैतन्याभावे जगतः अपि अभावः भवति इति ज्ञापनाय 'अभावे अभवः' इति पदद्वयम् । ननु आत्मनः तु अभावः कदाचिदपि नभवति तथा सति अभावे अभव इति कथमुक्तम् इति चेत् उच्यते भावशब्दस्य बहवः अर्थाः सन्ति । 'एकोऽहं बहु स्याम्' इति स्फुरणमपि भाव एव । तथा सति परमात्मनः तादृशे आशये संजाते जगत् जायते पुनः तस्या भावनाया

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपसंहारे जगतः अभावः इति अर्थः योजनीयः। अथवा भक्तौ सत्यां परमात्मनः भावस्य अनुभवः। अभक्तौ तु अभावं कथयति नास्तिकः। जडं देहादि तु निःसारं भवति। सर्वेषां सारं तु चैतन्यमेव इति विज्ञापनाय 'सर्वेषा मेव सर्वस्व' मिति पदानि।

८. संसारकारागारे रागद्वेषनिगडाभ्यां बद्धैः अस्माभिः प्राक् मुमुक्षा ग्रहणीया। उत्तम–मध्यम–मन्दा–तिमन्दभेदान् मुमुक्षवः चतुर्विधा भवन्ति। तापत्रयेण तप्तः उत्तमः मुमुक्षुः भवमहारोगान् भोगान्, दृढबन्धनरूपान् बन्धून्, अनर्थनिधिमर्थं च उपेक्ष्य परिग्रहं दुःखनिदानं मन्यमानः शीघ्रमेव सात्विकीं त्यागवृत्ति माश्रयति। वर्षासु सरित् इव तस्य मुमुक्षा तीव्रतया वर्धते। नरकद्वारभूतान् कामक्रोधलोभान् शत्रून् च वैराग्यसहायेन तिरस्करोति। जनसमाजे तु मूक इव बधिर इव जायते सः। इत्थ मुत्तमः मुमुक्षुः अस्मिन् एव जन्मनि मुक्तः भवति। मध्यमः तापत्रितयसंतप्तः सन् त्यक्तु मीहते किन्तु पंगुः इव मोक्षमार्गं त्यागं न अनुसरति। इत्थं कदाचित् सात्विक्या पुनः कदाचित् राजस्या तामस्या च धिया आकृष्टः दोलायते। एतादृशः मध्यमः मुमुक्षुः पुनः अन्यजन्मनि प्रयतेत चेत् मुक्तये समर्थः भवेत्। मन्दः मुमुक्षुः तु चिन्तयति, 'सकलानि अपत्यविवाहादीनि आवश्यकानि कर्माणि समाप्य षष्टिहायनः अहं धर्मं कुर्वन् ईश्वरं भजन् मुक्तो भविष्यामि इत्यादि।' एतादृशः तु जन्मान्तरेषु अपि प्रयतमानः भवेत् चेत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बहूनां जन्मना मन्ते मुक्तः स्यात् । अतिमन्दः तु प्रजल्पति, 'प्राप्तान् विषयान् कः परित्यजति । यथा गच्छन् जनः मार्गे पतितं मणिं प्राप्नोति तथैव अहमपि व्यवहारमार्गे गच्छन् एव मोक्षं प्राप्स्यामि इति।' एतादृशः तु कदापि न मुच्यते ।

आत्मसत्ता प्रदर्शिता । सांप्रतं त्रिभिः श्लोकैः आत्मनः चैतन्यरूपस्य द्योतनार्थं प्रयत्यते । अस्मिन् श्लोके तु त्रिभिः पादैः अवस्थाना मनुसन्धानं विधाय चतुर्थेन तु अवस्थानां प्रकाशकस्य आत्मनः साक्षिता अक्षरता च दर्श्यते ।

(६)

स्वप्नान् पश्यति सुप्तो वै सुप्ते जार्गति भावितः ।
सुप्तिमात्रं जगद् ह्येतत्, आत्मा साक्षी सदक्षरः ।।

पदकृत्यम्

इन्द्रियाजन्यविषयगोचराया अपरोक्षान्तःकरणवृत्त्यवस्थाया ग्रहणाय अनेकताप्रदर्शनाय च स्वप्नानिति । स्वप्नः पुरीतति इडानाड्यां च मनसि स्थिते अदृष्टविशेषेण दृश्यते इति स्मृतयः । अविद्यागोचराया मविद्यावृत्त्यवस्थायां प्राप्त इति संकेताय सुप्तपदम् । अवस्थान्तर निराकरणाय सुप्तेः इति । इन्द्रियजन्यविषयगोचराया मवस्थायां वर्तते इति सूचनाय 'जार्गति' इति । सुप्तः प्राणी अन्तर्निहितया भावनया पुनः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जागर्ति इति बोधनाय भावितपदम् । अनुभवजन्या स्मृतिहेतु र्भावना । जाग्रत्प्रपञ्चः अपि स्वप्नसदृशः कल्पितत्वात् अज्ञानस्य कार्यत्वात् इति संकेताय सुप्तिमात्रपदम् 'इन्द्रियाणा मगोचरत्वात् आत्मा असत्' इति प्रजल्पतां नास्तिकानां मतस्य खण्डनं [2]सत् इति पदेन विधीयते । इन्द्रियसंवन्धं विना साक्षात् जानाति इति [1]साक्षिपदम् । सांप्रतं वर्तमान मपि वस्तु पश्चात् नश्यति किन्तु आत्मा तु सर्वासु अवस्थासु कालत्रये च अविनाशी इति दृढीकरणाय [3]अक्षरपदम् ।

टी. १ 'साक्षात् अव्यवधानेन स्वरूपबोधनेन ईक्षते पश्यति इति' (शा. भा.) 'स्वप्रकाशज्ञानस्वरूपः अपि आत्मा अविद्योपहितः साक्षी इति उच्यते । वृत्तिमदन्तःकरणोपहितः प्रमाता इति उच्यते । भासकचैतन्यस्य एकरूपत्वे अपि घटं प्रति वृत्त्यपेक्षत्वात् प्रमातृता । अन्तः करणवृत्तीः प्रति तु वृत्त्यनपेक्ष-त्वात् साक्षिता' इति मधुसूदनः ।

२ सदेव सौम्येदमग्र आसीत् इति श्रुतिप्रसिद्ध मात्मनो नाम । 'सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।' इति स्मृतिः 'यद् विषया बुद्धि र्न व्यभिचरति तत् सत्' इति (शा. भा.) यद् व्यावृत्तो ष्वनुगतं तत् सत् । यथा सर्पधारादिषु अनुगतो रज्वादे रिदमंशः' इति आनन्दगिरिः । 'सजातीय-विजातीयस्वगतभेदशून्यं सत्' इति मधुसूदनः ।

३ न क्षरति इति अक्षरः । 'एतस्यैवा क्षरस्य प्रशासने

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः'। इति (बृ. उ. ३।८।९) 'अनेकसँसारिजन्तुकामकर्मादिसंस्काराश्रयः अक्षरः पुरुष उच्यते' इति शा. भा. 'कूटस्थोऽक्षर उच्यते' इति भगवान् कृष्णः। 'निर्विकारो मायोपाधि रक्षरः, उपाधिदोषेणाऽवशीकृतत्वाच्च असौ न क्षरति स्वरूपान्न च्यवते इति अक्षरः' इति नीलकण्ठः। कूटः शिलाराशिः पर्वत इव देहेषु नश्यत्स्वपि निर्विकारतया तिष्ठतीति कूटस्थः चेतनो भोक्ता अक्षरः इति' श्रीधरः।

८. बुद्धेः अवस्थाना मनुसन्धाने कृते एव प्रकाशक आत्मा ज्ञातुं द्रष्टुं च शक्यः। जाग्रति स्वप्नसुषुप्तिप्रपञ्चः न भवति। स्वप्ने जाग्रत्सुषुप्तिप्रपञ्चः न वर्तते। सुषुप्तौ जाग्रत्स्वप्नप्रपञ्चः नदृश्यते। (केवल मज्ञानाकारा सुखाकारा साक्ष्याकारा च वृत्ति र्भवति।) अवस्था आगमापायिन्यः। यथा स्वप्नः वासनामयत्वात् मिथ्या तथैव कल्पितत्वात् जाग्रत्प्रपञ्चः अपि मिथ्या एव। जाग्रति केवलं दृढभावनया सर्वः प्रपञ्चः बाह्य इव भाति। सुषुप्तौ अन्तः करणे अविद्यायां विलीने कि मवशिष्यते इति मननीयम्। अतः तिस्र एव अवस्थाः व्यतिरेकतः असत्या एव। जाग्रत्प्रपञ्चे पुनः पुनः आवृत्ते अपि कल्पितत्वात् दीर्घस्वप्नरूपत्वात् मिथ्या एव। साक्षी आत्मा तु अन्वयेन सर्वासु अवस्थासु अनुगतः अपि तिसृणामेव अवस्थाना भोक्तृ–भोग–भोग्ये–भ्यो विलक्षणः। सतः आत्मनः अभावः कदापि न भवति। अतः सर्वासा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मवस्थानां प्रकाशकः शुद्ध-चैतन्यरूपः आत्मा अहमिति निश्चयः कर्तव्यः । अवस्थापरिहारोपायः च विधेयः । सुषुप्तौ गतायां पुनः जाग्रति च अनागतायां यः क्षणमात्रः सन्धिकालः भवति तदा किं मवशिष्यते इति विचिन्तनीयम् ।

ज्ञातृज्ञानज्ञेयरूपायाः त्रिपुट्या अन्तर्गतं वृत्तिज्ञानमपि अज्ञानस्य एव विलासः किन्तु साक्षी आत्मा तु त्रिपुटीरहितः शुद्धज्ञानरूपः वृत्तिज्ञानस्य कारणे अज्ञाने नष्टे सति स्वतः प्रत्यक्षीभवति इति अत्र सप्तमेश्लोके उपदिश्यते ।

(७)

ज्ञान मज्ञानपर्यन्तं जीवनं मृत्युसंवृतम् ।
स्वप्नवत् सर्वमस्पष्टम्, आत्मा साक्षी सदक्षरः ॥

पदकृत्यम्

त्रिपुट्या अर्न्तगतस्य 'वृत्तिज्ञानस्य ग्रहणाय तथा जडताया निवारणाय च ज्ञानपदम् । यावत् अज्ञानं न नश्यति तावत् नानाविधः वृत्तिज्ञानप्रवाहः प्रचलति इति बोधनाय अज्ञान पर्यन्त मिति पदम् । तत एव च जन्ममृत्युचक्रं प्रचलति इति अत्र सूच्यते । जीवन मस्थिरं मृत्युना अनुसृत मर्थात् मरण मवश्यंभावि इति वैराग्यवर्धनाय 'मृत्युसंवृत' मिति । अन्येषु मृतेषु दृष्टेषु अपि अहं तु जीवामि इति दुराग्रहः जीवता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मज्ञानिनां जायते। वस्तुतः अनुसृतो मृत्युः कमपि नत्यजति। महेन्द्रः अपि मृत्युना ग्रस्यते। असंख्याः ब्रह्माण्डावलयः मृत्युग्रस्ताः। जाग्रतः सत्यतानिवारणाय 'स्वप्नवत्' इति। जाग्रद्व्यवहारः सत्यः स्पष्टः च इति कुमतनिराकरणाय सर्वमस्पष्ट मिति पदद्वयम्। जाग्रतः सर्वः व्यवहारः अस्पष्ट एव। श्वः किं भविता इति नजानीमो वयम्। भूगोल-खगोलयोः इयत्ता स्पष्टा नास्ति। स्वस्य शरीर-विषये अपि यथार्थतया वक्तुं नशक्नुमः। अभ्यन्तरे कियत्यः नाडयः सन्ति कथं च रक्तसंचारः जायते इत्यादि स्पष्टतया न ज्ञायते।

टी. १ वेदान्तपरिभाषायां दृश्यते, चैतन्यस्याऽनादित्वेऽपि तदभिव्यञ्जकान्तःकरणवृत्ति रिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्य मादिम दित्युच्यते। ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः। ... ... त्रिविधं हि चैतन्यम्। घटाद्यवच्छिन्न चैतन्यं विषयचैतन्यम्। अन्तः करण वृत्त्यवच्छिन्न चैतन्यं प्रमाणचैतन्यम्। अन्तः करणावच्छिन्नं प्रमातृचैतन्यम्। तत्र यथा तडागोदकं छिद्रात् निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति। तथा तैजस मन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते।

द्र. यद्यपि व्याघ्रस्य इव रूपं नास्ति तथापि खलु भयानकः मृत्युः पुनः अतीव क्रूरः घृणारहितः च वर्तते; बालकं,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तरुणं, विद्वांसं, वैज्ञानिकं, देवं च हन्ति; कीटान् सरीसृपानपि नत्यजति। परश्वः श्वः अद्य एव वा हन्ति इत्यपि नज्ञायते। अनात्मनि शरीरादौ आत्माभिमान एव मृत्युः इति केचिद् वदन्ति। प्रमादः अर्थात् आत्मस्वरूपात् च्युतिः एव मृत्युः इति सनत्सुजात आदिशति। स्थूलशरीरात् सूक्ष्मशरीरस्य निष्क्रमण-मेव मृत्यु रिति जना वदन्ति। तदा महान् क्लेशः भवति। सहस्रवृश्चिकदंशनादपि अधिकं दुःखं भवति इति श्रूयते। मृत्यु-शय्यायां सुप्तस्य कफवातपित्तपीडितस्य घुर्घुरायमाणस्य प्राणनिष्क्रमणाय समुद्यतस्य महतीं वेदनां द्रष्टुमपि न इच्छन्ति जनाः। मृते सति तु पत्नी अपि शवात् बिभेति। गर्भवासे जन्मसमये च तथैव अनिर्वचनीयं दुःखं भवति। घोरस्य जन्म-मृत्युचक्रस्य परिहारोपायः तु वृत्तिज्ञानस्य त्याग एव। कार्ये वृत्तिज्ञाने त्यक्ते कारणमज्ञानं स्वतः नश्यति। अतः विषयान् विषसमान् बुद्ध्वा विषयाकारायाः वृत्तेः त्यागे शनैः समाहि-तेनःभवितव्यम्। दैवी संपत्तिःअर्जनीया। ततःवृत्तिज्ञानस्य परि हारं कर्तुं शक्यते। तथा सति स्वत आत्मचिन्तनं भवति। भगवान् कृष्ण आदिशति, 'अनित्य मसुखं लोक मिमं प्राप्य भजस्व माम्।'

विद्युद्दामनि संभ्रमात् प्रतिभातः सर्प इव प्रपञ्चः क्षणिकः। साक्षी तु सत् अविनाशी। वस्तुतः असतः प्रपञ्चस्य भावः कदापि न भवति पुनः सतः आत्मनः अभावः कदापि न भवति। इत्यादि अष्टमे श्लोके सूच्यते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(८)

परमो-पात्त-पर्जन्य - विद्युद्-दाम्ना - हि-संभ्रम-
भ्राजमानः प्रपञ्चोऽत्र, आत्मा साक्षी सदक्षरः ।।

पदकृत्यम्

प्रधानादौ सृष्टिकर्तृत्वस्य निषेधाय परमोपात्तपदम् । सर्वोत्कृष्टः परमः ईश्वर एव । अज्ञानरूपस्य आवरणस्य द्योतनाय पर्जन्यपदम्। प्रपञ्चस्य क्षणिकत्वबोधनाय विद्युद्दामपदम् । दामनि सर्प इव परमात्मनि विवर्तरूपः प्रपञ्चः भ्रान्तैः दृश्यते इति ज्ञापनाय 'अहिसंभ्रम' इति। विद्युत्साहचर्यात् प्रपञ्चे अपि भ्राजमानपदम् । पञ्चाना माकाशादीनां भूतानां पञ्चीकरणतः जातस्य जगतः ग्रहणं प्रपञ्चपदेन सूच्यते ।

टी. १ 'एक आत्मा अग्रे आसीत् स इमान् लोकानसृजत' इत्यादि श्रूयते । 'मया अध्यक्षेण प्रकृतिः चराचरं जगत् सूयते' इत्यादि स्मर्यते । 'मया सर्वतो दृशिमात्रस्वरूपेण अध्यक्षेण मम माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः उत्पादयति सचराचरं जगत्, इत्यादि दृश्यते । 'अयस्कान्तवत् ईश्वरः उदासीनः सृष्टिप्रवर्तकश्च इति नीलकराठः । आलोचने कृते ज्ञायते यथा सूर्यस्य प्रकाशं प्राप्य सर्वो जनः स्वँ स्वँ व्यापारं कुरुते तथा चैतन्यरूपेण प्रकाशेन चराचरं परिवर्तते । अतः द्वैतेन्द्रजालस्य कारणभूतां प्रकृति मुपाश्रित्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परमात्मा कारण मुच्यते। सर्वाधिष्ठानभूतं परमात्मचैतन्यं विना जडा प्रकृतिः सर्गादीन् कर्तुं न शक्नोति इति सुस्पष्टम् अतः काल-स्वभाव-नियति–यदृच्छा–पञ्चमहाभूत–विज्ञानात्म-वादिनः श्रुतिसिद्धान्तविरोधिन इति।

८. प्रपञ्चः विद्युतः प्रकाश इव अस्थिर इति मन्तव्यः। पतिपत्नीपितृपुत्रादीनां संबन्धः धर्मशालायां पथिकानां समागम इव अनित्यः। अतः ममतां परित्यज्य प्रारब्धोपनीतं वस्तु निरहँकारपूर्वकं भुज्यताम्। प्रारब्धाधीनं हि शरीर मिति निश्चित्य मोक्षसाधनं समाश्रियताम्। बाह्यं तथा आभ्यन्तरं सर्वं दृश्य मनित्यम्। यथा घटपटादयः दृश्याः तथा मनबुद्धिचित्ताहंकारा अपि दृश्या एव। दृश्यत्व मेव अनित्यस्य लक्षणम्। केवलः एकः साक्षी आत्मा द्रष्टा नित्यः। दृश्येषु प्रतिभातेषु अथवा अप्रतिभातेषु अपि द्रष्टु रभावः न भवति। सुषुप्तौ समाधौ च अहमादीनां प्रतीतिः न जायते किन्तु साक्षी द्रष्टा तु सदा विराजते। वस्तुतः अहंपदस्य अर्थः तु अहंकारादीनां साक्षी एव। आत्मनः अत्यन्तनिकटतमः अहंकारः अपि भ्रान्त्या आत्म-सदृशः प्रतिभाति; किन्तु अहंकारः जडः दृश्यः विकारी अनित्यः परप्रकाश्यः परिच्छिन्नः च वर्तते। किन्तु आत्मा तु तद्विलक्षणः सत् चिद्घनः स्वप्रकाशः परिपूर्णः परमानन्दरूपः च विराजते। आत्मनः प्रतिबिम्बादेव जडः अपि अहंकारः सचेतन इव मन्यते। यथा अग्नितप्तः लोहपिण्डः उष्णः रक्तः च दृश्यते। अहंकारः अन्तःकरणस्य धर्मः न आत्मनः। अतः अहंकारं परित्यज्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अवस्थासु वृत्तिषु च व्यावृत्तासु अपि सदा अनुवर्तमानस्य आत्मनः अनुसन्धानं विधेयम् ।

यथा घटाकाशः महाकाश एव तथा आत्मा अपि ब्रह्मणः अभिन्न इति त्रिभिः श्लोकैः प्रतिपाद्यते । सांप्रतं नवमे श्लोके तु मम यथार्थं स्वरूपं किम् इति अनुसन्धाय निश्चयार्थं गुरुप्रपत्तिः समाश्रयणीया इति उपदिश्यते ।

(६)

एको गतिषु संभिन्नः किंरूपः किल चिन्त्यताम् ।
गुरुयोगात् प्रबुद्धः स्यात्, आत्मा ब्रह्मोपपद्यते ।।

पदकृत्यम्

सांख्यानां पुरुषवहुत्वस्य निषेधाय एक पदम् । अवस्थानां नानायोनीनां च बोधकं गतिषु इति । देवगन्धर्वमनुष्यपशुपक्षिकीटपतङ्गादियोनिषु तथा बाल्ययौवनवार्धक्यादिषु विविधाकारताया ज्ञापनाय संभिन्नपदम् । शिरस आदाय पादाङ्गुष्ठ पर्यन्ते अहं कः कीदृशः च इति स्वकीयस्य यथार्थस्वरूपस्य विवेचनं जिज्ञासुभिः मनुष्यै र वश्यमेव विधेय मिति निर्देशनं 'किंरूपः चिन्त्यता' मिति पदद्वयेन क्रियते । प्रार्थनार्थं निश्चयार्थं च किलपदम् । स्वस्य प्रयत्नेन एव आत्मवोधः जायते न गुरोः आवश्यकता इति वितण्डाया निवारणाय गुरुयोगात् इति । गुरुकृपात एव आत्मज्ञानं जायते इति शासनाय

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रबुद्धपदम् । यथा दारुणि व्याप्तः अपि अग्निः ज्वलिताग्निसंयोगेनशीघ्रमेव प्रकटीभवति तथा ब्रह्मनिष्ठस्य गुरोः महावाक्योपदेशतः स्वहृदयप्रकाशक आत्मा स्वतः साक्षात् क्रियते । अन्तःकरणोपाधेः शुद्धचैतन्यस्य बोधक मात्मपदम् । व्यापकस्य निरुपाधेः शुद्धचैतन्यस्य ज्ञापकं ब्रह्मपदम् । आत्मनः ब्रह्मभावः उपपत्तिपूर्वक इति उपपद्यतेपदम् । घटाकाशस्य महाकाशत्वे घटोपाधित्यागा दन्यः प्रतिबन्धः नास्ति । तथा उपाधेः परिहारे आत्मा ब्रह्मता मापद्यते । वस्तुतः उपाधेः सत्त्वे अपि आत्मा ब्रह्म एव । तथापि शोधितयोः तत्त्वंपदयोः एकताया मात्मा ब्रह्म भवति ।

टी. 'शुल्ककृष्णे द्वे गती । शुक्लया निष्कामया अनावृत्ति याति । कृष्णया कामनासहितया तु पुन रावर्तते । जायस्व म्रियस्व इत्येतत् तृतीयं स्थानम् । तस्मा देवंविधां संसारगतिं जुगुप्सेत । माभू देवंविधे संसारमहोदधौ घोरः पातः' इति (शा. भा.) 'एको वशी सर्वभूतान्तरात्मा रूपं रूपं बहुधा यः करोति' (कठ. उ. २।२।१२।) 'तद् विज्ञानार्थं स गुरु मेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ।' (मु.उ.१।२।१२) 'आचार्यवान् पुरुषो वेद (छा उ. ६।१४।२) 'प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ ।' (कठ. उ. २।६) वेदाः स्तुवन्ति 'व्यसनशतान्विताः समवहाय गुरो श्चरणं वणिज इवाज सन्त्यक्तकर्णधरा जलधौ ।' बृहधातोः मनिन्प्रत्यये ब्रह्म सिध्यति । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति (तै. उ. २।१) 'अक्षरं ब्रह्म परमम्' इति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(गी ८।३) 'श्रुतिप्रसिद्ध मखण्डैकरसं वस्तु अक्षरसंज्ञितं तद् ब्रह्म' इति नीलकण्ठः 'निरुपाधिकमेवात्र ब्रह्म विवक्षितं ब्रह्म-शब्देन न तु सोपाधिक मिति मधुसूदनः। 'बृहत्वाद् बृंहणत्वाच्च यद्रूपं ब्रह्मसंज्ञितम्। प्रत्यस्तमितभेदं यत् सत्तामात्र मगोचरम्। वचसा मात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्।' (वि. पु. ६।७।५३)।

द्र. गुरोः माहात्म्यं वर्णयितुं कः शक्नोति? स्पर्शात्मा मणिः लोहं सुवर्णं रचयति न तु स्वसदृशम्, किन्तु गुरुः तु प्रपन्नं शिष्यं स्वसदृशं सच्चिदानन्दरूप मापादयति। गुरौ स्पर्शस्य अपि आवश्यकता न भवति केवलं सान्निध्यादेव श्रीखण्डवृक्ष इव स्वसदृशं कारयति। चतसृषु कृपासु गुरुकृपा एव मोक्षमूलम्। गुरु मुपेक्ष्य शतवर्षपर्यन्तं तपस्यायां कृतायामपि आत्मसाक्षात्कारो न भवति। भगवतः श्री शंकराचार्यस्य कृपया एव त्रोटकाचार्यः श्रुतिसारसमुद्धरणे समर्थः अभवत्। अज्ञानतिमिरेण अन्धस्य शिष्यस्य ज्ञानाञ्जनशलाकया आन्तरस्य चक्षुष उन्मीलने गुरुः एव समर्थः। यस्य वचनामृतं संसारविषं हन्ति तादृशः गुरुः वरणीय एव। गुकारः मायादि गुणभासकः अत एव अन्धकार इत्यपि कथ्यते। रुकारः माया भ्रान्तिविमोचकस्य वाचकः अतः तेज इत्यपि निगद्यते। हरौ रुष्टे गुरुः रक्षितुं समर्थः किन्तु गुरौ रुष्टे कोऽपि रक्षितुं न शक्त इति श्रूयते। अतः गुरुः एव पिता, माता, ईश्वरः च। यस्य गुरौ परा भक्तिः भवति दीर्घनमस्कारं, परिप्रश्नं, सेवां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

च श्रद्धया यः करोति तस्य एव कथिता अर्थाः प्रकाशन्ते । सतः ब्रह्मनिष्ठस्य गुरोः सङ्ग एव सत्सङ्गः, अत एव वाङ्मनः कायकर्मभिः गुरोः हितं विधेयम् ।

निष्कामकर्मयोगस्य फलरूप आत्मनः ब्रह्मरूपतायाः साधको ध्यानयोगः अत्र दशमे श्लोके विशदीक्रियते ।

(१०)

संयम्य सर्वतो वृत्ति मिन्द्रियाणि मनो मतिम् ।
योऽवशिष्येत् स्वयंज्योतिः, आत्मा ब्रह्मो पपद्यते ।।

पदकृत्यम्

संयम्यपदेन वृत्तेः निरोधः निर्दिश्यते । अन्यथा मेघेन सूर्य इव विषयाकार–वृत्त्या आत्मा आच्छाद्यते । केवल मेकत एव वृत्तिनिरोधे यथार्थ मात्मदर्शनं न भवति इति 'सर्वतः' पदस्य प्रयोगः । वृत्तिपदेन अन्तःकरणपरिणामः बोध्यते । वृत्तिः चलनरूपा परिणामरूपा च । प्रथम मिन्द्रियवृत्तेः निरोधः विधेय इति 'इन्द्रियाणि' पदं प्रागुल्लिखितं भवेत् । इन्द्रिय वृत्तिः स्थूला भवति । यथा श्रोत्रेन्द्रियेण प्रथमं शब्दः सामान्यतया श्रूयते, किन्तु कस्य शब्द इति न ज्ञायते । बुद्धिवृत्त्या तु शंखशब्द इति निश्चीयते । गच्छतः पुरुषस्य मार्गमुभयतः गृहाणि भवन्ति । तानि प्रथमं केवलया चक्षुर्वृत्त्या दृश्यन्ते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इद मीदृशं गृह मिति न चिन्त्यते। एतादृशी एव इन्द्रियवृत्तिः। संकल्पविकल्परूपायाः वृत्तेः ग्रहणाय मनः पद मुल्लिखितम्। तच्च इन्द्रियसहकारि भवति। दुष्टेसु अपि विषयेषु अशोभनत्वादर्शनेन शोभनाध्यास एव संकल्पः तस्मात् च 'इदं मे स्यात्' इत्यादिस्वरूपा वृत्तयः प्रभवन्ति। इन्द्रियवृत्तेः सूक्ष्मा भवन्ति मनोवृत्तयः। मतिपदेन निश्चयात्मिकाया वृत्तेः ग्रहणं विधीयते। तया एव मनोवृत्तिं संयच्छेत्। मनोवृत्तेः अपि सूक्ष्मतरा भवति बुद्धिवृत्तिः। अत्र मतिपदेन अहंकार-वृत्तिरपि लक्ष्यते। सूक्ष्मतमा भवति अहंकार-वृत्तिः। अह ममुकविषये निपुण इत्यादि विषयज्ञातृत्वाहंकारः अशुद्धचित्तस्य भवति। अह मात्मानमनुभवामि इति अहंभावः शुद्धचित्तस्य भवति। अहं ब्रह्मास्मि इति ब्रह्माकार-वृत्तिपर्यन्तमपि सूक्ष्मतमः अहंकारः भवति [२]य इति पदेन सर्वेषां कारणरूपं प्रकाशक मात्मवस्तु बोध्यते। कार्ये नष्टे अपि कारणमवशिष्टं भवति। घटे नष्टे अपि व्यावहारिकसत्तायां मृत्तिकाया अवशेषो भवति तथैव इन्द्रियादिषु विलीनेषु अपि आत्मा अवशिष्टः भवति न शून्य मिति बोधनाय 'अवशिष्येत्' इति पदस्य आवश्यकता जाता। शून्यस्य ज्ञातु रभावे कथं शून्यं सिध्येत्? 'तर्हि आत्मनोऽपि प्रकाशकः अन्यः स्यात्' इति शंकाया निवारणाय [३]स्वयंज्योतिः पदस्य सार्थकता। आत्मा तु चित्स्वरूपत्वात् स्वयमेव प्रकाशते। तस्य अन्यः प्रकाशकः नास्ति।

टी. १ गवादिष्विव वाङ्निरोधः प्रथमा भूमिः। बाल-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुग्धादिष्विव निर्मनस्त्वं हि द्वितीया । त न्द्र्यामिवाहंकारराहित्यं तृतीया । सुषुप्ताविव महत्तत्त्वराहित्यं चतुर्थी । इति मधुसूदनः ।

२ यच्छब्देन स्वतः सिद्धवस्तूद्देशवाचिना ब्रह्म निर्दिश्यते । इति ब्रह्म यत् । यतो वा इमानि भूतानि जायन्ते (तै.उ. ३।१) इति श्रुतेः ।

३. अयं पुरुषः स्वयंज्योति र्भवति । (बृ. उ. ४।३।६) 'विज्ञातु र्नैव विज्ञाता परोऽन्यः संभवत्यतः' इति उपदेश साहस्री । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत इति भगवद्गीता । 'महाभूतादि धृत्यन्तं क्षेत्र मेकः सन् प्रकाशयति कः क्षेत्री परमात्मेत्यर्थः' (शा. भा.) 'चतुर्विंशतितत्त्वात्मकं क्षेत्रं स्वसत्तामात्रेण प्रकाशयति नतु व्यापाराविष्टतया कुविन्द इव पटम्' इति नीलकण्ठः । 'आत्मसंस्थं मनः कृत्वा नकिञ्चिदपि चिन्तयेत् इत्यस्य आलोचने दृश्यते, 'आत्मैव सर्वं न ततोऽन्यत् किंचिदस्ति इति चिन्तयेदिति । अत्र पूर्वार्धेन संप्रज्ञातसमाधिः पुनः उत्तरार्धेन असंप्रज्ञातसमाधिः लक्ष्यते अतः ध्यातृध्यानध्येयविभागरूपं त्रिपुटीं त्यजेत् किन्तु अखण्डैकरससंविदात्मना तिष्ठेत्' इति विद्वांसः ।

द्र.– ध्यानविषये विभिन्नं लक्षणँ दृश्यते, 'निर्विषयं मनोध्यानमिति केचन । ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनसि उपसंहृत्य मनश्च प्रत्यक्चेतरि एकाग्रतया यच् चिन्तनं तद् ध्यान मिति अपरे । विजातीय प्रत्यय तिरस्कार पूर्वकं सजातीय प्रत्ययस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तैलधारावत् संततः अविच्छिन्नः प्रवाहः ध्यानमिति इतरे। कर्मयोगे सम्यक् कृते ध्यानं कर्तुं शक्यते। कर्मफलमनाश्रित्य ईश्वरार्पणबुद्ध्या कर्म क्रियते चेत् कर्मयोगः भवति। इन्द्रियाणि स्वकीयेषु विषयेषु प्रवर्तन्ते अहं तु न कर्ता इति विचिन्त्य कर्मणि कृते कर्तृत्वं शिथिलं भवति। निरतिशयसुखाय मोक्षाय कर्मफलं स्वतः त्यज्यते कर्मयोगिभिः। कर्मणि संपूर्ण व्यापारे विवेकतः कर्माभावं पश्यति कर्मयोगी। वस्तुतः कर्तृत्वमेव जन्म-मृत्युचक्रभ्रमस्य कारणम्। विकर्मरूपं शास्त्रनिषिद्धं कर्म त्यक्तव्यम्। पुनः किमपि कर्म न करोमि इति अकर्मरूपः अहंकारः त्याज्यः। किन्तु शास्त्रविहितं स्वस्वधर्मानुसारं कर्म कर्तृत्वाभिमानं तिरस्कृत्य ईश्वरप्रीतये कर्तव्यम्। कर्मासक्तिः परिहार्या। तथासति ध्यानं सुकरं भवति। ध्यानस्य परिपाके आत्मसाक्षात्कारः संजायते।

अस्मिन् एकादशे श्लोके श्रीमद्भगवद्गीताया द्वादशे अध्याये अर्जुनाय उपदिष्टस्य सर्वभूताना मद्वेषादेः धर्म्यामृतस्य निर्देशनं संक्षेपेण विधीयते।

(११)

अमानः स्यात् समानः स्यान् निर्द्वन्द्वोऽसङ्ग एव च।
निष्कामः सर्वदानन्द आत्मा ब्रह्मोपपद्यते॥

पदकृत्यम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अमानपदेन अभिमानस्य त्यागे भक्तैः प्रयत्नो विधेय इति उपदिश्यते। देहादिषु आत्मत्वेन अभिमान एव बन्धः। शत्रुमित्रकलत्रादिषु तथा पशुपक्षिकीटपतङ्गसरीसृपादिषु अर्थात् सर्वेषु प्राणिषु समभावः स्यात् इति आदेशाय समान पदस्य प्रयोगः। सर्वत्र सममेक मविक्रिय मात्मानँ पश्ये दिति भावः। निर्द्वन्द्वपदेन द्वैतं निषिध्यते। खलु द्वैते सुखदुःखादि-रूपः द्वन्द्वः भवति। विषयेषु आसक्तिनिवारणाय असङ्गपदं प्रयुक्तम्। पुत्रधनलोकैषणायाः त्याग एव असङ्गता। वस्तुतः अहंतामूलक एव संगः भवति। देहादीनां तादात्म्यस्य अभावे सङ्गो नभवति नि[१]ष्कामपदस्य प्रयोगस्तु सकलकामनानां त्यागस्य विधानाय। कामना एव कष्टस्य कारणम्। कामादेव क्रोधादयः प्रभवन्ति। अतः कामः पापस्य मूलम्। यः चैतन्या-ग्नौ कामं जुहोति स एव सुखशान्ति माप्नोति। निष्कामः धर्म्यामृततृप्तः परायां ज्ञाननिष्ठायां स्थितः चतुर्थः ज्ञानी भक्त एव साक्षात्कारं कर्तुं शक्नोति। ततः सर्वदा आनन्दरूपः भवति इति [२]सर्वदानन्दपदेन सूच्यते। एतच्च प्राचुर्यार्थे मयट्प्रत्यये सिद्धस्य आनन्दमयस्य पर्यायः नतु विकारार्थस्य।

टी. १ 'निष्कामस्य प्रकर्षो बासनाराहित्य' मिति आनन्द गिरिः। 'यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।' (कठ. उ. २।३।१४) 'जाग्रति भगवद्ध्यानादिरूपसद्वासनाबलेन, स्वप्ने तथा असं-प्रज्ञातसमाध्यभ्यासबलेन पुनः संप्रज्ञातसमाधिकाले दहर-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विद्यादिषु प्रसिद्धा दिव्याः कामा अपि परिहर्तव्या इति नील-कण्ठः। २. श्रूयते च रसोवैसः। रसं ह्येवायं लब्ध्वा आनन्दी भवति'। 'यो हि अन्या नानन्दयति स प्रचुरानन्द इति प्रसिद्धं भवति' इति शा. भा.।

द्र. यदा सत्त्वगुणाश्रया बुद्धिः भवति तदा सात्विकं सुखं प्राप्य ध्यानयोगाभ्यासिनः प्रसीदन्ति। रजसा बुद्धेः विक्षेपे ते उद्‌विजन्ते। सत्त्वरजस्तमोगुणात्मिकायाः बुद्धिवृत्तेः स्वरूपं भगवद् गीताया मपि प्रदर्शितम्। साक्षात्कारिणः महात्मानस्तु सर्वदानन्दरूपा भवन्ति। तेषा मानन्दः निर्गुणः अखण्डितश्च। अतो जीवन्मुक्ताः संप्रवृत्तान् गुणान् न द्विषन्ति, निवृत्ताँश्च नकाङ्क्षन्ति। साधकास्तु सत्त्वाय स्पृहयन्ति, तमसे रजसे च द्रुह्यन्ति। तैः परमात्मा प्रार्थनीयः, 'प्रभो, असंख्यानां ब्रह्माण्डानां सृष्टिस्थितिलयान् केवलेन संकल्पेन कुरुते भवान्। अतः एव पुनः पुनः सादरं नमामि, निवेदयामि च। मम मानसं तमः रजश्च सत्वेन हरतु भवान् पुनः सत्त्वमपि शुद्ध-सत्त्वेन। घोरं संसारं विलोक्य भीतोऽस्मि। त्रिमुखः अहंकार-सर्पः मां सततमेव दशति कदाचित् श्वेतेन मुखेन पुनः कदाचिद् रक्तेन पुनः कदाचित् कृष्णेन च। पुनः त्रिविधेन तापदावान-लेन परितः संतप्तोऽस्मि। नाशय जन्ममृत्युचक्रम्। सांप्रतं भवन्तं विना कोऽपि रक्षको नास्ति। खलु शरणागतवत्सलो भवान्। दीनानां जनानां दुःखस्य नाशकत्वात् जनार्दनः दीनबन्धुः इति च आख्यायते भवान्। स्वकीयं नाम सार्थकं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विधीयताम् । स्तुतिं कर्तु महं न जानामि नच परा भक्तिः मयि वर्तते । तथापि अनुग्रहो विधीयताम् । दिव्यं चक्षु र्दीयताम् । येन भवन्तं द्रष्टुं शक्नुयाम् । येन परमानन्दसागरे निमग्नस्य मम शोको मोहश्च नष्टः स्यात् ।

विभिन्न संप्रदायानां मतानि निराकृत्य श्रुति-संमतं यथार्थ मात्मनः स्वरूप मत्र प्रदर्श्यते ।

(१२)

निराकारोऽपरिच्छिन्नः शून्यत्वे नैव सारता ।
चिद्घनो निर्गुणो गूढ आत्माऽद्वैतो निरञ्जनः ॥

पदकृत्यम्

नेत्रनाशे तद्दृष्टस्य ज्ञानस्य नाशो न संपद्यते । ज्ञानं तु सर्वै रनुभूयते एव । यदि नेत्रपिण्डमेव चक्षुः स्यात् तदा आधेयस्य नाशे तद्दृष्टस्य ज्ञानस्य अपि नाशः स्यात् तत्तु न संभवति इति मनसि निधाय देहात्मवादिनां नास्तिकानां चार्वाकादीनां मतं [1]निराकारपदेन निरस्यते । स्याद्वादिनां जैनानां देहपरिच्छिन्न आत्मा इति मतं निरसितु म[2]परिच्छिन्न-पदं प्रयुक्तम् । जैना हस्तिमशकादिषु प्राणिषु शरीरावच्छिन्न मात्मानं स्वीकुर्वन्ति । तथात्वे आत्मनो नित्यत्वं न संभवेत् । प्रतीत्यसमुत्पादिनो बौद्धाः शून्यं समर्थयन्ति किंच ते पुनर्जन्म

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अपि स्वीकुर्वन्ति। सत्पदार्थस्य अभावे पुनर्जन्म न संभवति इति शून्यस्य असारतां बोधयितुं '³शून्यत्वे नैव सारता इति पदानि। चिद्घनपदेन खद्योत इव चिज्जड आत्मा इति वादिनां भाट्ट-मीमांसकानां मतं निराक्रियते। 'यदि आत्मा जडमात्रः स्यात् तदा सुषुप्तेः सुखस्य तदनुभवस्य च स्मृतिः कथं स्यात् ? पुनः सुषुप्तौ किमपि नज्ञातमिति जडताया अनुभवोऽपि भवति। अतः चिज्जड इति तेषां मतम्। किन्तु रसघनः प्रज्ञानघनः इत्यादि श्रुतिविरुद्धत्वात् तन्मतं प्रत्याख्येयम्। यथा सैन्धवलवण-घनस्य अन्त र्बहिश्च लवणरस एव निरन्तरो भवति तथा आत्मनः चैतन्या दन्यद् किमपि नास्ति। निर्गुणपदात् परमात्मा सविशेषः सगुणश्च न निर्गुण इति वादिनां मतं निरस्यते। गूढ पदेन अविद्यया तत्कार्यैश्च प्रच्छन्न आत्मा दुर्विज्ञेय इति बोध्यते। अविद्यानाशाय तु सतत मात्मचिन्तनरूप उपायः कर्तव्यः। जीवेश्वरयोः द्वैतं मन्यमानानां तथा ईश्वरः चित् अचित् इति त्रैतं स्वीकुर्वतां मत मद्वैत पदेन निराक्रियते। सोपाधिकात्मवादिनां मतस्य खण्डनाय निरञ्जनपदम्। अज्ञान-मेवाऽञ्जनम्। तेन रहितः निरञ्जनः निर्लेप इति। वस्तुतः परमार्थे ब्रह्मस्वरूपे अज्ञानं नास्ति, यथा आकाशे नीलवर्णता कदापि नास्ति नीलं नभ इति तु भ्रम एव।

टी. १ 'साकार मनृतं विद्धि निराकारं तु निश्चलम्' इति स्मर्यते २ 'परिच्छिन्नत्वं च त्रिविधम्। तत्रात्यन्ताभाव प्रतियोगित्वलक्षणं देशतः परिच्छिन्नत्वम्। ध्वंसप्रतियोगित्व-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लक्षणं कालतः परिच्छिन्नत्वम्। अन्योन्याभावप्रतियोगित्व-लक्षणं वस्तुतः परिच्छिन्नत्वम्' इति दृश्यते। ३ अस्मिन् सति इदं भवति इति मान्यता बौद्धानां दृश्यते। एकस्य नाशे अन्यस्य उत्पत्तिः प्रतीत्यसमुत्पादः कथ्यते। क्षणभङ्गुरश्च प्रतीत्यसमुत्पाद इति अन्ये आचार्याः। नसन् नासन् न सदसन् नचाप्यनुभयात्मकम्। चतुः कोटिविनिर्मुक्तं तत्त्वं माध्यमिका जगुः इति शून्यवादिनां चरमः सिद्धान्तः किन्तु शून्यता ज्ञातुरभावे कथं सिध्येत् ?

जैनमते पदार्थो द्विविधः आत्मा अनात्मा च। आत्मा तु त्रिविधः परमात्मा, अन्तरात्मा, बहिरात्मा चेति। समुद्रस्य तरङ्गादिवत् परमात्मन एव सर्व परिणामः। जीवेन जगता सह च तस्य भेदाभेदौ। इत्यादि।

आचार्य रामानुजः विशिष्टाद्वैतवादी। तस्य मते जीवः भोक्ता जडं भोग्य मीश्वरः नियामक इति त्रयः पदार्थाः सन्ति। वदन्ति च ईश्वर श्चिदचिच्चेति पदार्थत्रितय मस्ति' ज्ञान-कर्मणोः समुच्चये रामानुजस्य आग्रहः प्रतिभाति पुनः भक्ति प्रपत्ति च मोक्षसाधनं स्वीकरोति सः। मध्वाचार्यः द्वैतवादी द्वैतं नाम भेदः स च पञ्चधा जीवेश्वरभेदः, जडेश्वरभेदः, जीवजडभेदः, जीवानां भेदः, जडानां परस्परं भेदः। संपूर्णगुण-संपन्नः विष्णुः स्वतन्त्रं तत्वम्। निर्विकारं ब्रह्म निमित्तकारण-मेव। आचार्यो निम्बार्को द्वैताद्वैतवादी! चित्, अचित् तथा ब्रह्म इति त्रीणि तत्त्वानि स्वीकरोति। बल्लभाचार्यः शुद्धाद्वैतवादी।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोलोकाधीश्वरः पुरुषोत्तम उपास्यः अग्नेः तथा स्फुलिङ्गस्य इव जीवेश्वरयोः ऐक्यमिति अस्य मतम् । पुन रस्य पुष्टिमार्गः प्रशस्तः ।

द्र. आत्मचिन्तकैः तु सर्वेषु संप्रदायेषु आसक्ति परित्यज्य यथार्थानुसन्धानपरैः भवितव्यम् । सर्वासां सरितां महासागर इव सकलसंप्रदायानां प्राप्तव्यः तु परमात्मा एव । ऋजुमार्गेण अथवा कुटिलेन अपि प्राप्तव्यं लक्ष्यं तु अखण्डं सुखमेव । यद्यपि पूर्वसंस्कारतः एकस्मिन् संप्रदाये रुचिः जाता चेदपि अन्यसंप्रदाये द्वेषो न कर्तव्यः । यस्य हृदयगुहायां रागद्वेषरूपौ सर्पौ-स्तः तस्य सुखं तु शशशृङ्गमिव सुदुर्लभम् । रागद्वेषान्धो मनुष्यः शास्त्रोपदिष्टं राजमार्गं न पश्यति, देशिकस्य उपदेशं बधिर इव श्रोतुं न शक्नोति, पंगुः इव प्राप्तव्यं परमं पदं प्राप्तुमसमर्थो भवति । आत्मा तु निर्लेपः तस्मिन् कापि विशिष्टता नास्ति । रागद्वेषयोः प्रकाशकस्तु स एव । अतः प्रथमं विषसमान् विषयान् त्यक्त्वा त्यागाहंकारमपि उन्मूल्य आत्मसाक्षात्कारः करणीयः ।

निर्गुणात् निराकारात् शुद्धचैतन्यरूपात् ब्रह्मणः सगुणं साकारं जडं जगत् कथं समुत्पन्न मिति प्रश्नस्य उत्तरं दातु मेषा कारिका प्रस्तुता स्यात् ।

(१३)

अव्यक्तत्वा दचिन्त्यत्वाद् ब्रह्मणि नैव विभ्रमः ।
कूटस्थे तु वहि र्वाह्य आत्माऽद्वैतो निरञ्जनः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पदकृत्यम्

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं सर्वत्र प्रमाणं न भवति यथा विलोकितचन्द्रमण्डलस्य विस्तारः न प्रमाणकोटिमवगाहते। भ्रम स्तु इन्द्रियार्थसन्निकर्षजन्ये व्यक्ते एव भवति इत्यादि अव्यक्तत्वादिति पदेन ध्वन्यते। इन्द्रियैः अय मीदृश एव इति न व्यज्यते इति अव्यक्तः अर्थात् लौकिक प्रत्यक्ष-प्रमाणेन ज्ञातु-मशक्यः । अचिन्त्यत्वादिति पदेन तु मनसापि चिन्तयितु मशक्यत्वात् न परामर्शजन्य मनुमेयं ब्रह्म इति व्यज्यते । सावयवे परिच्छिन्ने वस्तुनि एव भ्रमः भवति न तु निरवयवे व्यापके इति तत्त्वोपदेशाय ब्रह्मणि इति पदम् । अत: संविन्मा-त्रात् ब्रह्मणः जगतः जन्मादयः न भवन्ति । तर्हि जगत् कस्मात् जात मिति संशयस्य समाधानं कूटस्थपदात् भवति। कूटे मायारूपे उपाधौ तिष्ठति इति कूटस्थः। अन्तः दोषपूर्णया वहिः गुणयुक्तया मायया सहितः । मायोपाधेः ईश्वरात् एव जगतः जन्मादयः प्रभवन्ति। पुनः मायायाः सत्त्वप्रधानत्वात् मायापतिः कूटस्थः स्वरूपात् न च्यवते अतः न मायाधीन इति वहिः तथा वाह्य इति पदद्वयेन बोध्यते। यथा मायावी सूत्रधारः मायां प्रदर्शयन् स्वमायया मुग्धो न भवति किन्तु केवलं दर्शका नन्यान् मोहयति तथा कूटस्थः मायोपाधि रीश्वरः जगत्सृष्टि कुर्वन्नपि स्वरूपान्नच्यवते । अत एव सः अच्युतः ।

टी. १ रूपादिहीनत्वा दय मव्यक्तः । चिन्त्योऽनुमेयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तद्विलक्षणोऽयम् । क्वचित् प्रत्यक्षो हि वन्ह्यादि गृहीतव्याप्तिकस्य धूमादेः दर्शनात् क्वचिदनुमेयो भवति । अप्रत्यक्षे तु व्याप्तिग्रहणासंभवान् नानुमेयत्वमिति भाव इति मधुसूदनः २ कूटस्थोऽक्षर उच्यते इति भगवान् कृष्णः। कूटो माया वञ्चना कुटिलतेति पर्यायाः । अनेक मायादिप्रकारेण स्थितः कूटस्थः क्षराख्यस्य पुरुषस्यो त्पत्तिबीज मनेकसंसारि जन्तु काम कर्मादि संस्कारा श्रयः' इति (शा. भा.) 'यथार्थवस्त्वाच्छादनेन अयथार्थवस्तुप्रकाशकः कूट इति मधुसूदनः । कूटः शिलाराशिः पर्वत इव देहेषु नश्यत्स्वपि निर्विकारतया तिष्ठतीति' भाष्योत्कर्षदीपिका । निर्विकारो मायोपाधिः अक्षरः कूटस्थ इति नीलकण्ठः । इति सर्वं हृदि निधाय कारिकायां कूटस्थपदं प्रयुक्तं भवेत् ।

८. अत्र पूर्वार्धेन अजातवादः पुनः उत्तरार्धेन सृष्टिदृष्टिवादः सूच्यते । मृगतृष्णायां जलमिव ब्रह्मणि जगत् कदापि नास्ति । सूर्ये अन्धकारस्य संभव एव न भवति । एषा यथार्था वस्तुदृष्टिः किन्तु यावद् मावरण मस्ति तावद् भूमिगर्भे निगूढस्य सुवर्णनिधेः इव अजातवादस्य वार्ता लाभप्रदा न भवति । अतः प्राक् सृष्टिदृष्टिवादः समाश्रयणीयः । मायोपाधेः ईश्वरात् सृष्टिः जाता । अतः सर्वभूतेषु गूढः कर्माध्यक्षः स एव भक्त्या भजनीयः । वस्तुतः सृष्टिः नाम समुद्रे फेनादिवत् चैतन्ये नामरूपयोः प्रसारणा एव । ते नामरूपे दृश्ये । तयोराश्रयादेव कामक्रोधादयो जायन्ते । यदा कामक्रोधादयो हृदये उद्भवन्ति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदा मननीयं 'यद् एते कामादयः आगमापायिनः अनित्याः। अहँ तु द्रष्टा नित्य आत्मा। दृश्येन द्रष्टा कदापि न दूष्यते। कामादीनां प्रादुर्भावात् प्राक् अहमासम्। सांप्रतं कामादीन् अहं प्रकाशयामि। पुनः कामादिषु गतेषु अपि अहं तु तिष्ठामि एव इत्यादि।' इत्थं सर्वासां वृत्तीनां राहित्ये आत्मसाक्षात्कारः जायते। एष एव दृश्यानुविद्ध समाधिः। ततः अहमसङ्गः सच्चिदानन्दः स्वप्रकाशः सर्वसाक्षी अस्मि इत्यादि शब्दमाश्रित्य शब्दानुविद्धः समाधिः विधेयः। एतस्य परिपाके अर्थात् दृश्यशब्दयो रुपेक्षायां स्वानुभूतेः रसावेशात् निर्विकल्पः समाधिः भवति। पुन रेतेषां त्रयाणां बाह्यान्तर भेदेन षड्विधः समाधि विधेय इति शास्त्रे समुपदिश्यते।

गुडजिह्वान्यायेन पूर्वार्धतः सगुणं प्रतिपाद्य उत्तरार्धेन यथार्थं निर्गुणस्वरूपं विशदीकृत्य सगुणनिर्गुणयो रेकता अत्र ध्यज्यते।

(१४)

विशिष्ट इष्टतो मान्यो भक्तापेक्षितविग्रह :।
निर्विशेषः शिवः शान्त आत्माऽद्वैतो निरञ्जनः ॥

पदकृत्यम्

परमात्मा तु निर्गुण एव न सगुण इति मतं निराकृत्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुनः सगुणः अपि समग्रैश्वर्य्यशक्तिसंपन्न इति विशिष्ट पदेन व्यज्यते। सर्वातिशायिना विलक्षणेन विशेषेण युक्तः विशिष्टः भवति। यः सर्व मतिशेते स एव विशिष्टः। करुणावरुणालयत्वात् ईप्सितफलदातृत्वेन परमप्रेमास्पदत्वाच्च इष्टत इति पदम्। मान्यपदतः सर्वेश्वरत्वात् माननीय इति द्योत्यते। निर्गुणस्य अतीव दुर्ज्ञेयत्वात् भक्तजनानुग्रहाय निर्गुण एव भक्तैः निरन्तरं चिन्तितं सगुणं ब्रह्मविष्णुशिवादिरूपं दधाति इति भक्तापेक्षितविग्रह इति पदात् बोध्यते। निर्विशेष पदात् निर्गुणः स्थूलादिविशेषणेन रहित इति निश्चीयते। परिशुद्धस्य परमानन्दबोधस्य निरतिशयकल्याणरूपस्य बोधनाय शिव-पदम्। अन्तः प्रज्ञत्वादि सर्वविकाररहित इति ज्ञापनेन शान्त-पदस्य सार्थकता।

टी. शान्तं शिव मद्वैतं चतुर्थं मन्यन्ते इति (मा. उ. १।७)

चिन्मयस्याद्वितीयस्य निष्कलस्या शरीरिणः।
उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना॥
इति स्मर्यते

शास्त्रेषु दृश्यते, 'प्राक् सगुणा भक्तिः आश्रयणीया। दंभक्रोधमात्सर्यदूषिता तामसी तथा परपीडादिरहिता अपि स्वस्य अभ्युदयकामा राजसी च त्याज्या। पाप–प्रक्षालिका

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरार्पणरूपा सात्विकी अवलंबनीया। एतस्याः परिपाकतः परा भक्तिः प्रादुर्भवति। ततः तैलधारासम मखण्डितं चित्तं परमात्मनि स्थिरं भवति। सार्ष्टि सालोक्य सामीप्य सायुज्यादिमुक्तये अपि भक्ता न परिलषन्ति इति वेदाः स्तुवन्ति। अतन्द्रितः सन् परया अनुरक्त्या परमात्मानमेव अभेदेन चिन्तयति। प्रारब्धाधीनं सर्व मिति दृढ निश्चयतः शरीर संरक्षणादिषु भक्तस्य चिन्ता न भवति। शरीरतादात्म्यत्यागात् अहंकारादिना रहितो भक्तः अनन्येनैव भावेन भजति। अतः रागद्वेषादयः स्वतः विलीयन्ते।

भक्तिसूत्राचार्यो नारद उपदिशति, 'परमात्मनि परमप्रेमरूपा तदर्पिताखिलाचारिता पुनः तद्विस्मरणे परमव्याकुलता च भक्तिः।' अन्यस्य आश्रयंत्यक्त्वा केवल–परमात्माश्रितता अनन्यभक्तिः। विषयत्यागः, असङ्गता, अखण्डभजनं, महतां सेवा, कुसङ्गत्यागः निर्ममता च भक्तेः साधनानि। मूकस्य आस्वादनवत् अनिर्वचनीयं प्रेमस्वरूपं कामनारहित मविच्छिन्नं सूक्ष्मतमानुभवरूपं च भवति। अभिमानादिकं त्याज्यम्। एकान्तिनो भक्ता मुख्याः। विवादो नावलम्ब्यः। क्षणार्धमपि व्यर्थं न नेयम्। अहिंसासत्यशौचादीनि परिपालनीयानि। चिन्तां त्यक्त्वा सर्वदा सर्वभावेन भगवानेव भजनीयः।

भगवान् कृष्ण आदिशति, 'परा अपरा चेति प्रकृतिद्वयम्। महाभूतादिभ्य आरभ्य अव्यक्तपर्यन्त मपरा। जीवभूता (क्षेत्रज्ञलक्षणा) प्राणधारण-निमित्त-भूता तु परा। तथासति शरीरे-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्द्रियमनोबुद्ध्यादयः अपि अपरारूपाः, किन्तु तेषां ज्ञाता तु परारूपः इत्थं स्वशरीरे एव प्रकृतिद्वयं भवतः पश्यति । अनन्य-चेताः यः नित्यशः सततं मां स्मरति तस्य योगिनः अहं सुलभः । एतादृशेभ्यः भक्तेभ्य एव ब्रह्माकाररूपं बुद्धियोग महं ददामि । सर्वात्मा सर्वरूपः च अहं नित्ययुक्तान् भक्तान् संसारसागरा दुद्धरामि, निर्गुणां भक्ति ददामि । सा च ज्ञाननिष्ठारूपा । इत्यादि' 'क्षेत्रज्ञ-परमात्मैकत्वज्ञानस्य कर्त्रादिकारक-भेद-बुद्धि-निबन्धन–सर्वकर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानं सा परा ज्ञाननिष्ठा' इति (शा. भा.) ।

भक्तिरसायने मधुसूदन सरस्वती महोदयः लिखति, 'प्रथमं महतां सेवा, ततः तद्दयापात्रता, धर्मे श्रद्धा, हरिगुण-श्रुतिः, ततः रत्यंकुरोत्पत्तिः, ततः स्वरूप–प्राप्तिः, ततः प्रेमवृद्धेः परमानन्द–स्फुरणं ततः भागवतधर्मे निष्ठा, ततः स्वस्मिन् गुणशालिता, ततः प्रेम्णः परमा काष्ठा उदेति' इत्यादि । विष्णुपुराणे (६।५) दृश्यते, श्रुतिवाक्योदितं सूक्ष्मं तद् विष्णोः परमं पदम् । अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज । पूजायां भगवच्छब्दः क्रियते ह्युपचारतः । ज्ञानशक्तिबलैश्वर्य-वीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयै र्गुणा-दिभिः ॥

प्रणवस्य वेदसारतां निरूपयितुं वेदानां सारं गायत्री पुनः तत्रापि बीजरूपः प्रणव इति उल्लिख्य तत्त्वमसि महावाक्यं च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परामृश्य आत्मनः सर्वाधिष्ठानरूपता सनातनता च त्रिभिः श्लोकैः व्यज्यते ।

(१५)

वेदानां त्रिपदा सारं तस्या ओंकार उच्यते ।
ओंनामासि त्वमेवेति आत्मा धर्मः सनातनः ।।

पदकृत्यम्

सर्वशास्त्राणां सारतायाः तथा ज्ञानात्मकताया अभिव्यञ्जनाय पुनः परमात्मनः निःश्वासरूपत्वात् प्रामाण्यबोधनाय च वेदानामिति । विद् धातुः चुरादौ सुखाद्यनुभवे आख्याने वर्तते; तुदादौ लाभार्थकः, रुधादौ मीमांसार्थकः, दिवादौ भावार्थकः अदादौ ज्ञानार्थकः च वर्तते । विद्धातोः अचि घञि वा वेदः सिध्यति । पादत्रयरूपायाः गायत्र्या ग्रहणाय त्रिपदायाः प्रयोगः । ननु गायत्र्याः चतुर्थः पादः अपि वर्तते तथा सति कथं त्रिपदा इति प्रयुक्तं चेत् उच्यते त्रिपदाया एव जपविधिः दृश्यते । विधानमनुसृत्य एव त्रिपदा इति कथितम् । चतुर्विंशत्यक्षरैः गायत्र्या यत् प्रतिपादितं तत् एकाक्षरेण ओंकारेण एव बोध्यते अतः गायत्र्याः सार मोंकारः । विश्वतैजसप्राज्ञानां तथा विराड्-हिरण्यगर्भेश्वराणां शुद्धचैतन्यमात्रेण ब्रह्मणा सह ऐक्य मोंकारेण लक्ष्यते । ओंकार एव वेदानां वीजम् । किंच प्रणवः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परमात्मवाचकः। अतः ओमित्यभिधेयं तत् ब्रह्म त्वमेव असि इति 'तत्त्वमसि' महावाक्यस्य अर्थबोधनाय 'ओंनामासि त्वमेव इति' पदानां सार्थकता। धर्मपदेन आत्मनः सर्वाधिष्ठानता बोध्यते। सर्वेषां धारणादेव धर्मः। धर्मं राराध्यते इति वा धर्मः। सना इति नैरन्तर्ये तच्च त्रिविधपरिच्छेदराहित्यम्। व्यापके आत्मनि तत् अस्ति इति व्यञ्जनाय सनातनपदस्य प्रयोगः। सनातन श्चिरन्तनः कस्मादपि कारणात् अनुत्पन्नः एक रस इति। यथा वृक्षस्य पत्रपुष्पफलादिभिः स्वगतः भेदः भवति। वृक्षान्तरात् सजातीयः पुनः पाषाणादिभ्यः तु विजातीयः भेदः भवति किन्तु व्यापकत्वात् अवयवराहित्येन आत्मनि त्रिविध एव भेदः नास्ति।

टी. गायन्तं त्रायते इति गायत्री। द्विजानां कृते गायत्री मन्त्र एव उत्तमः। स्पर्शमणिं प्राप्य अपि कः अन्येभ्यः स्फटिका- दिभ्यः स्पृहयेत्। मननात् यः रक्षां करोति स एव मन्त्रः। 'त्रिभ्य एव तु पादेभ्यः पादं पाद मदूदुहत्' इति (मनुस्मृतिः २।७७) गायत्री एव वेदस्य मुखं ब्रह्मणः प्राप्तेः द्वारं च। छान्दोग्ये दृश्यते, 'गायत्री वा इदं सर्वं भूतं यदिदं किं च। वाग्वै गायत्री वाग् वा इदं सर्वं भूतं गायति च त्रायते च इति।' श्रद्धया भक्त्या च त्रिसन्ध्यं यदि जपः क्रियते चेत् शक्तेः विकासः शान्तेः परमानन्दस्य च अनुभवः भवति। भगवान् कृष्ण आदिशति, 'यज्ञानां जपयज्ञोऽस्मि' इति।

ओंकार एव आत्मप्राप्तेः उत्तम उपायः। यः परस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अपरस्य च ब्रह्मणः वाचकः। यत् कालत्रय-परिच्छेद्यं कालत्रयातीतं च ओंकार एव। यथा रज्जुः सर्पादीनां विकल्पाना माश्रयः भवति। तथा ओंकारः अपि सर्वस्य वाक्प्रपञ्चस्य आश्रय एव। तस्य आत्मनः वाणीरूपेण सूत्रेण अर्थात् नाममयरज्वा इदँ जगत् व्याप्तम्। खलु नामनामिनोः अभेद एव भवति। तथापि नामप्राधान्य मत्र दृश्यते। विश्वतैजसप्राज्ञादिषु पादेषु क्रमशः पूर्वपूर्वस्य कार्यस्य उत्तरस्मिन् उत्तरस्मिन् कारणे विलापने कृते तुरीयं प्रतिपद्यते। प्राज्ञ स्तु आत्मनि अध्यस्तः। यथा अविद्यया अध्यस्तानां रज्जुसर्पादीनां रज्जुरूपेण एव सत्त्वं तथा प्राज्ञस्य अपि तुरीयरूपेण एव सत्त्वम्। अध्यस्तः अधिष्ठानाद् भिन्नो न भवति। अत ओंकारे एव चेतः निदध्यात्। ओंकारानुसन्धाने नित्ययुक्तस्य क्वचिदपि भयं नभवति। आलम्बनत्वेन प्रतीकत्वेन च ओंकारोपासना उपदिष्टा। स्मर्यते (वि. पु. ३।१७।२१) च, प्रणवावस्थितं नित्यं भूर्भुवः स्वरितीर्यते। ऋग्यजुः सामाथर्वाणो यत्तस्मै ब्रह्मणे नमः। धर्माख्यं च तथा रूपं नमस्तस्मै जनार्दन। ओंकार–विषये विशेषतः प्रश्नमाण्डूक्यादीना मुपनिषदा मनुसन्धाने कृते सर्वं स्पष्टीभवति।

द्र. 'तत्त्वमसि' इति उपदेशरूपं महावाक्यम्। त्वंपदवाच्यार्थः जीवः। अतः त्वंपदस्य शोधनावश्यकता जाता। अतः विषयचिन्तनं त्यक्त्वा यथाशक्ति अन्तर्मुखेन भाव्यम्। अन्तर्मुखता एव आत्माभिमुखता। प्रथम मेकक्षणपर्यन्तँ निश्चलं चित्तं विधीयताम्। ततः क्रमशः द्वित्रक्षणेभ्य आरभ्य शतक्षण-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पर्यन्तमपि विषयाकाररहितं चित्तं कर्तुं शक्यते। निश्चलेन चित्तेन स्वत आत्मसुख मनुभूयते। प्रथम मवस्थानां बुद्धि-वृत्तीनां च प्रकाशक आत्मा इति परोक्षं ज्ञानं भवति। बाल्या-दयः तथा जाग्रदादय अवस्थाः पुनः बुद्धिवृत्तयः च आयान्ति गच्छन्ति च। किन्तु प्रकाशकः त्वंपदलक्ष्य आत्मा तासु सदा अनुस्यूतो विराजते। पुनः एकस्या मवस्थायां गताया मन्यस्या अवस्थाया अनुदये अर्थात् अवस्थासन्धिषु द्रष्टुः आत्मनः लोपः न भवति। 'तदा कीदृक् अनुभवः स्यात् पुन स्तत्र कः अवशिष्टः भवति' इत्यादि अनुसन्धानं मुमुक्षुभिः जाग्रति करणीयम्। ध्यानयोगस्य अभ्यासः सदा कर्तव्यः। सकलबुद्धिवृत्तीनां परि-हारे अवशिष्ट आत्मा त्वंपदलक्ष्यः स्वतः अनुभूयते। यथा नानाच्छिद्रेण घटेन आच्छादितः दीपः घटापनयने सति साक्षा-त्कृतो भवति इत्थं निष्कामकर्मयोगफलरूपेण ध्यानयोगस्य परिपाकेन त्वंपदे शुद्धे रागद्वेषरूपं मलं कर्तृत्व–भोक्तृत्वरूपो विक्षेपश्च विलीयते।

तत्पदस्य वाच्यः अर्थः मायोपाधि रीश्वरः। यथा राज्ञः राज्य मुपाधिः भटस्य तु खेटकः किन्तु द्वयोः उपाधेः परिहारे कृते न राजा न च भटः। अतः श्रुतिप्रमाणानुकूलया युक्त्या जीवेश्वरयोः अल्पज्ञत्व-सर्वज्ञत्व-परोक्षा-परोक्षत्वाद्युपाधेःपरिहारे भागलक्षणया केवलचैतन्यग्रहणात् ऐक्यं संभवति। कर्मेन्द्रियेण ज्ञानेन्द्रियेण अन्तः करणेन च वैषयिकीं क्रियां त्यक्त्वा स्वस्वरूपे स्थिते ईश्वरध्यान मित्युच्यते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदान्तपरिभाषायां दृश्यते, 'तत्त्वंपदवाच्ययो र्विशिष्टयो रैक्यायोग्यत्वेऽपि लक्ष्यस्वरूपयो रैक्य मुपपादितमेव। अत एव तत्प्रतिपादक–तत्त्वमस्यादि–वाक्याना मखण्डार्थत्वं सोऽय मित्यादि वाक्यवत्।'

पूर्वकारिकाया मुत्तमेभ्यः मध्यमेभ्यश्च अधिकारिभ्यः परमार्थतत्त्व मुपदिष्टम्। सांप्रतं तु अधमा नुद्दिश्य अकारोकार मकाराणां तथा वैश्वानर–तैजसप्राज्ञाना मेकतायाः फलं पुनः अमात्रस्य तुर्यस्वरूपं च प्रदर्श्यते।

(१६)

मात्राऽवस्था समाख्याता जानन्नेति त्रिधा गतिम्।
अमात्रो निर्गति स्तुर्य आत्मा धर्मः सनातनः॥

पदकृत्यम्

मात्रापदेन अकारोकारमकारा गृह्यन्ते। लघुवर्णोच्चारणकाले वर्णावयवभेदः मात्रा। मीयते अनया इति माधातोः तन् प्रत्यये टापि मात्रा (परिच्छित्तिः) इति सिध्यति। स्वप्न-सुषुप्त-जागरित-स्थानानां विश्वतैजसप्राज्ञानां ग्रहणाय अवस्था-पदस्य प्रयोगः। विश्वाऽकारयोः तैजसोकारयोः तथा प्राज्ञमकारयोः च एकता समाख्यातपदेन बोध्यते। जानन् इति पदात् एकतारूपाया उपासनायाः कर्ता व्यज्यते। उपासनानुसारं त्रिविधफल–प्रदर्शनाय त्रिधा गतिमेति पदानि। मात्रारूपात

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विलक्षणस्य आत्मनः बोधनाय अमात्र–पदस्य प्रयोगः । तथा व्यापकताबोधनाय निर्गतिपदम् । व्यापकं वस्तु कुत्रापि न गच्छति यथा आकाशः । तुर्यपदेन विश्वतैजसप्राज्ञापेक्षया चतुर्थ इति बोध्यते ।

टी. वर्णेषु अकारस्य प्रथमतया पुनः जाग्रदभिमानिनः विश्वस्य (वैश्वानरस्य) अपि प्राथम्येन समानता । अकारमकारयोः मध्ये स्थितत्वात् उकारस्य तथा विश्वप्राज्ञयोः मध्यस्थत्वात् तैजसस्य च समानता । यथा प्राज्ञात् विश्वतैजसयोः उत्पत्ति-प्रलयौ तथा अकारोकारयोः मकारात् भवति इति द्वयोः समानता । अकारवैश्वानरयोः एकताज्ञाता सर्वान् कामान् आप्नोति । द्वितीय-पादस्य द्वितीयमात्रायाश्च एकताज्ञाता विज्ञानसन्ततिं वर्धयति । तृतीयपादमात्रयोः एकतोपासकः जगतः याथात्म्यं जानाति । जगत्कारणात्मा च भवति । इत्यादि फलानि माण्डूक्ये दृश्यन्ते । प्रश्नोपनिषदि तु मनुष्यलोक सोमलोक–ब्रह्मलोकरूपाणि फलानि प्रदर्शितानि ।

साधकानां मात्राणां पादानां यथावदुपास्यमान ओंकारः ब्रह्म-प्रतिपत्तये आलम्बनी भवति । अत्रावान्तरफलकथनं प्रधानसाधनस्तुत्यर्थमिति (शा. भा.) एतादृशेन उपासनेन ओंकारस्य एव स्तुतिः कृता । अतः न उपासनाभेदः कथित इत्याशयः ।

द्र. दशमस्त्वमसि इत्यत्र या कथा श्रूयते । तस्याः समुत्पत्तिरपि ओंकारादेव इति कथयन्ति विद्वांसः । यथा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जाग्रतः भोक्तृभोग्यभोगाः त्रयः तथा स्वप्नस्य ते त्रयः पुनः सुषुप्तेः ते त्रयः। इत्थं योगे कृते नव भवन्ति। अज्ञानिन स्तु अवस्थानां परामर्शमेव कुर्वन्ति किन्तु त्रिपुटीरहितं प्रकाशकं दशम मात्मानं न जानन्ति अतः शोकयुक्ता भवन्ति अतः शोक-नाशाय ब्रह्मनिष्ठादाचार्यमुखात् श्रवणं कर्तव्यम्। श्रवणं नाम अद्वितीये ब्रह्मणि तात्पर्यनिश्चयानुकूला मानसी क्रिया इति कथयन्ति। महावाक्य–श्रवणादेव ज्ञानं भवति अत एव श्रवण-मेव मुख्य मिति समादिशति पद्मपादाचार्यः। वाक्यानुग्राहक-न्यायशीलनं तु मननम्। मध्यमाधिकारिभिः तु मननं निदिध्यासनं च कर्तव्यम्। निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्य आत्मविषय-कस्थैर्यानुकूलो मानसो व्यापारः इति केचित्। निदिध्यासनमेव साक्षात्कारोपाय इति निर्दिशति वाचस्पतिमिश्रः। वस्तुतस्तु त्रिपुट्याः परिहारे सत्येव साक्षात्कारो भवति।

वेदस्य कर्मकाण्डः अर्थात् कर्मोपासनारूपः प्रवृत्तिमार्गः तथा ज्ञानकाण्डः (निवृत्तिमार्गः) च ओंकार माश्रयति इति अत्र प्रदर्श्यते।

(१७)

ओमित्युक्त्वा प्रवर्तन्ते निवर्तन्तेऽथ ब्राह्मणाः।
ओं सर्वं स्वीकरोतीव, आत्मा धर्मः सनातनः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पदकृत्यम्

परमात्मनो मङ्गलमयनामत्वात् प्राक् प्रणवस्यो च्चारणं कृत्वा एव प्रवृत्तिपरायणै र्यज्ञादि कर्म विधीयते इति उपदेशाय 'ओमित्युक्त्वा प्रवर्तन्ते' इति । खलु यज्ञादीनां वैगुरायपरिहाराय प्रणवजपरूपं प्रायश्चित्तं स्मृतिषु स्मर्यते । निवर्तन्तेऽथ ब्राह्मणा इति द्वितीयार्धेन निवृत्तिपरायणाः सततं ब्रह्मवादिनोऽपि फल मनभिसन्धाय प्रणवानुसन्धानं विदधति इति निर्दिश्यते । ब्राह्मणा इति त्रैवर्णिकोपलक्षणमिति श्रूयते । प्रणवः स्वीकारार्थश्च कोशेषु दृश्यते । अतः चित्तशुद्धिहेतुत्वात् कर्मकाण्डं तथा मोक्षहेतुत्वात् ज्ञानकाण्डं प्रणवः स्वीकरोति इति तृतीयार्धेन सूच्यते ।

टी. येन केनचि दाच्छन्नो येन केनचिदाशितः । यत्र वकचनशायी च तं देवा ब्राह्मणं विदुः । य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया इति स्मर्यते । प्रणवस्य स्वीकारार्थे प्रयोगः शिशुपालवध महाकाव्येऽपि दृश्यते, 'ओमित्युक्तवतोऽथेति' । भगवान् कृष्ण आदिशति, 'तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनामिति । यज्ञे सर्वेषा मृत्विज्ञां क्रिया ओंकारपूर्विका भवन्ति। यतो वैगुण्यराहित्यं जायते । ओमिति ब्रह्मणो नाम । जगत्कारणत्वेन श्रुति प्रसिद्ध मपि अविदुषां परोक्षत्वा दयथार्थं कथ्यते । दृश्यते च, 'यथार्थानुभवः प्रत्यक्ष मेव इति चार्वाकाः । अनुमितिरपि इति काणाद बौद्धाः । उपमितिरपि इति नैयायिकैकदेशिनः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शाब्दोऽपि इति नैयायिकाः । अर्थापत्तिरपि इति प्राभाकराः । अनुपलब्धिकोऽपि इति भाट्टवेदान्तिनौ । सांभविकः ऐतिह्यकःच इति पौराणिकाः । चेष्टिकः अपि इति तान्त्रिकाः ।

द्र. विष्णुपुराणे षष्ठे अंशे षष्ठे अध्याये एका कथा दृश्यते, 'जनकवंशीयौ खाण्डिक्य–केशिध्वज–नामानौ राजानौ बभूवतुः । खाण्डिक्यः कर्मधुरंधरः बभूव केशिध्वज स्तु ज्ञान-प्रवीणः । तयो र्युद्धे पराजितः खाण्डिक्यो वनं जगाम । एकदा केशिध्वजस्य होमधेनु व्याघ्रो ममार । धेनोः रक्षां कर्तु मशक्नुवता मया किं प्रायश्चित्तं कर्तव्यमिति केशिध्वजो ब्राह्मणान् पप्रच्छ । ते समुचितं प्रायश्चित्तं वक्तुं न शेकुः । ततः कृष्णाजिनधरः केशिध्वजः शत्रोः खाण्डिक्यस्य समीपं गत्वा प्रायश्चित्तं पप्रच्छ । प्रार्थितः खाण्डिक्यः अपि यथोचितं प्रायश्चित्त मुपदिदेश । प्रतिनिवृत्तः केशिध्वजोऽपि विधिपूर्वकं प्रायश्चित्तं कृत्वा प्रसन्नः सन् पुनः खाण्डिक्यसमीपं गत्वा 'भवते कां गुरुदक्षिणां ददामि ?' इति निवेदयामास । 'अविद्या-न्तर्गतं राज्यं मादृशैः कथं प्रार्थ्यते ?' इति मनसा विचिन्त्य 'अध्यात्मविज्ञान मुपदिशतु भवान्' इति खाण्डिक्येन प्रार्थिते केशिध्वजः उपदिदेश, 'अनात्मनि आत्मबुद्धिः तथा यत् स्वकीयं न तस्मिन् स्वकीय मिति बुद्धिः घोर–संसार–वृक्षस्य बीजम् । अर्थात् अहंता ममता च अविद्यालतायाः पुष्पद्वय मित्यादि ।

इत उपसंहारः प्रारभ्यते । श्रुतिसिद्धान्तः प्रदर्शितः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सांप्रतं शास्त्रान्तरैः युक्त्या च स एव परिपोष्यते दृढीक्रियते च ।

(१८)

स्फुरति विशति संविद् यत्र सकृद् विभातः
विविध-विभवभावान् नेहते नेति नेति ।
अविदित—विदिताभ्या मन्यताऽनन्य एव
अहमितिपरिपूर्ण-प्रत्ययः प्रत्यगात्मा ।।

पदकृत्यम्

स्फुरति इति सृष्टेः अथवा स्वप्नजाग्रतोः व्यञ्जकम् । सुषुप्तेः प्रलयस्य च बोधनाय विशति इति । संविदिति शुद्ध चैतन्यस्य चेत्योन्मुखतासूचकम् । यत्र इति सर्वाधिष्ठानस्य ब्रह्मणः सूचक मथवा अवस्थाबोधकम् । सकृद् विभात इति निरन्तर भासमानता सूच्यते । जाग्रदादिषु कालत्रये च स्वप्रकाशत्वात् प्रत्यगात्मा विभाति एव । यथा आच्छादकः अपि मेघः सूर्येण एव प्रकाश्यते तथा आवरणरूप मज्ञान मपि प्रत्यगात्मना एव प्रकाश्यते । विविध विभव भावान् नेहते इत्यनेन सृष्टि-स्थिति-लयादीनां नानाविधाना मैश्वर्यादीनां शुद्धे प्रत्यगात्मनि निषेधः सूच्यते । नेति इति आवृत्या कार्यं जगत् कारणमज्ञानं च नास्ति इति विविच्यते । व्याकृत-बीजस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अविद्यारूपस्य अव्याकृतस्य बोधनाय अविदित मिति । विदित-पदेन तु क्रियाकर्मभूतं व्याकृतं बोध्यते । विदिताविदितयो विलक्षणः इति अन्यतया सूच्यते । प्रत्यगात्मनोऽद्वितीयता निरूपणाय अनन्य एव इति । अहमितिपरिपूर्णप्रत्यय इत्यनेन अहं पदार्थः अहमादिसाक्षी परमात्मा निर्दिश्यते । १ ब्रह्माकारा वृत्तिः एव प्रत्ययपदस्यार्थः । प्रत्यगात्मनः सर्वान्तरत्वं ज्ञाप्यते । प्रतीय देहेन्द्रियादिभ्यः अंच्यते प्रकाशते इति प्रत्यक् । अर्थात् अन्तः करणादीनां प्रकाशकः । प्रतीप मञ्चति इति वा अर्थात् अन्तः करणादीनां पृष्ठे स्थित्वा पश्यति । प्रतिशरीर मञ्चति इति वा । अर्थात् प्रतिशरीर मभ्यन्तरे स्थित्वा प्रकाशकः । अत्र अहं ब्रह्मास्मि इति महावाक्यस्य अनुभवरूपः अर्थः ध्वन्यते ।

टी. सकृद्विभातं सर्वज्ञं नोपचारः कथंचन ।३।३६ गौडपादकारिकायाः शांकरभाष्ये दृश्यते, 'सदैव विभातं सदा-भारूप मग्रहणान्यथाग्रहणाविर्भावतिरोभाववर्जितत्वादिति पुनः 'अन्यदेव तद् विदितादथो अविदितादधि' (के. उ. १।३) इत्यस्य भाष्ये दृश्यते, 'विदितं नाम यद् विदिक्रिययातिशयेनाप्तं विदिक्रियाकर्मभूतं तस्मादन्यत् पुनः अविदिताद् विदितविपरीता दपि अधि उपरि ।

द्र. अत्र योगवासिष्ठ महारामायणस्य अपि ध्वनि रस्ति । अतः तस्य उद्धरणं समुचितमेव भवेत्, 'तस्मा दनाख्यानाद् ब्रह्मणः सर्वमुत्पद्यते स्वयमेव तद् घनतां प्राप्य मनः संपद्यते । तेन योऽयं परमेष्ठी तन्मनस्तत्त्वं विद्धि । स मनस्तत्वाकारो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भगवान् ब्रह्मा संकल्पमयत्वाद् यदेव संकल्पयति तदेव पश्यति ...... प्रथमं जातमात्रेण पुंसा किंचिद् विकसित–बुद्धिना एवं सत्संगमपरेण भवितव्यम् । तेन विवेकतः पुरुषस्य हेयोपादेयविचार उपजायते । तदाऽसौ शुभेच्छाभिधां विवेकभुव मापतितो भवति । ततो विवेकवशतो विचारणायाम् प्राप्नोति । सम्यग् ज्ञानेन असम्यग्वासनां त्यजतः संसारभावनातो मन स्तनुता मेति । तेन तनुमानसां नाम विवेकभूमि मवतीर्णो भवति । यदैव योगिनः सम्यग् ज्ञानोदय स्तदैव सत्त्वापत्तिः । तद्वशाद् वासना-तनुतां यदा गता तदैव असौ असंसक्त इत्युच्यते कर्मफलेन न बध्यते इति । अथ तानववशा दसत्ये भावनातानव मभ्यस्यति । यावन् नकुर्वन्नपि समाधिस्थोऽपि व्यवहरन्नपि (व्युत्थितोऽपि असत्येषु संसार–वस्तुषु स्थितोऽपि स्वात्मन्येव क्षीणमनस्त्वा दभ्यासवशाद् बाह्यं वस्तु (स्नानभोजनादि) कुर्वन्नपि न पश्यति, न आलम्बनेन (रुच्या) सेवते, नाभिध्यायति तनुवासनत्वाच्च केवलं मूढः सुप्तप्रबुद्ध इव परेच्छया कर्तव्यं करोति । तनुभावितमनस्क स्तेन योगभूमिकां भावना मधिरूढः । इत्यन्तर्लीनचितः कतिचित् संवत्सरानभ्यस्य सर्वथैव कुर्वन्नपि बाह्यपदार्थान् भावनां त्यजति तुर्यात्मा भवति । ततो जीवन्मुक्त इत्युच्यते ।

उपरि उक्तस्य श्रुतिमूलतां निरूप्य आत्मचिन्तनस्य फलं निवेद्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निगमगदिततत्त्वं प्रस्तुतं सत्यसत्यम्,
अमृतमभयमेतद् भाव्यते भाग्यवद्भिः ।
दमयति दमनीयं दक्षिणामूर्तिमौनं
गमयति पद मन्त्यं स्वस्तिमूलं मुमुक्षून् ।।

पदकृत्यम्

निगमगदिततत्त्वस्य प्रयोगतः आत्मचिन्तनं न कपोलकल्पितं किन्तु श्रुतिसंमत मिति ज्ञाप्यते। केवलं व्यावहारिकं सत्यं न किन्तु पारमार्थिकं सत्यमिति निवेदनाय सत्यसत्यमिति। परमार्थत्वादेव मरणरहित ममृतम्। द्वैताद् भयं भवति अतः अद्वैत–प्रतिपादकत्वा दभय मिति। निरन्तर मात्मचिन्तनेन एव परमं पदं प्राप्यते अतः आसुप्तेः आमृतेः आत्मान मेव भावयेत् इत्युपदेशाय भाव्यते इति। अतिशयपुण्यात्मनां पूर्व पूर्वजन्मसु अपि किंचित् किंचित् संस्कार मुपचित्य जातानां शुद्धचित्ताना मेव आत्मचिन्तने मतिः प्रवर्तते इति 'भाग्यवद्भिः' प्रयुक्तः भवेत्। लयविक्षेपकषायरसास्वादादीनां समाधिविघ्नानां परिहारः अत्यन्तकठिनः। वासनारहितत्वमेव मुक्तत्व मिति श्रूयते च। अतः मोक्षः आकाशकुसुमसदृश इति वादिनां प्रश्नस्य समाधानाय दक्षिणामूर्तिमौन मिति। दक्षिणःसृष्टिस्थिति लयादिषु कुशलः पुन अमूर्तिः मूर्तिरहितः सर्वान्तरस्थः प्रत्यगात्मा एव साधकानां मुमुक्षूणां दमनीयं रागद्वेषा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दिं तत्कारणं च मौनरूपेण निरस्यति । अथवा दक्षिणां दिशं प्रति अभिमुखा मूर्तिर्यस्य स शिवः। सृष्टे रादौ निवृत्तिपरायणाः सनकादयः शिवं गुरुं प्रपन्नाः । तदा भगवता शिवेन अपि चिन्मुद्रया ते उपदिष्टा इति श्रूयते । अथवा परमात्मनः गुरोः च ऐक्यात् ब्रह्मनिष्ठो गुरुः मौनरूपेण शिष्याणां दमनीयं दमयति । अन्त्येन पदेन वासनाना मन्ते (नाशे) एव प्राप्यं जन्ममृत्युमोचनं मोक्षपद मिति प्रतिपाद्यते । परमानन्दरूपं तत् पदं कल्याणमूल मिति व्यञ्जनाय स्वस्तिमूल मिति । "कान् प्रापयति ?" इति प्रश्नस्य उत्तररूपं मुमुक्षुपदम् ।

टी. सत्यस्य सत्य मिति (बृ. उ. २।१।२०) सत्यस्य सत्य मृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः इति भागवत दशमस्कन्धे देवाः स्तुवन्ति ।

द्र. कर्मयोगेन मलदोषे भक्तियोगेन च विक्षेपे अतिक्रान्ते सम्यग् विवेचनं संभवति । ततः ज्ञानयोगेन आवरणमपि नश्यति । अतः प्राक् गीतात्रयोदशाध्यायोक्त ममानित्वादिकं ज्ञानसाधनं संग्रहीतव्यम् । किं क्षेत्रं कश्च क्षेत्रज्ञ इति विविच्य महाभूतादेः क्षेत्रस्य बाधः कर्तव्यः। तैलधारावत् संततेन ध्यानेन उत्तमाधिकारिण आत्मानं पश्यन्ति । सत्त्वरजस्तमांसि गुणा दृश्या अहं तु तद्व्यापार-साक्षिभूत आत्मा इत्यादि–सांख्ययोग माश्रयन्ति मध्यमाः । गुणेभ्यः अन्यं गुणव्यापार-साक्षिभूत मात्मानं ये साक्षात्कुर्वन्ति ते परमात्म–भावं गच्छन्ति । श्वः पर्यन्तमपि स्थास्यति न वा इति अनिश्चितः संसारतरुः पुत्र–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वित्त–लोकैषणात्यागेन देहादिषु तादात्म्यबुद्धेः राहित्येन शस्त्रेण छेदनीयः। यावद् अहंता ममता च तिष्ठति तावत् परमात्म-स्वरूपा-लोचनं सूदूरतरं भवति। अतः संशय-विपर्यय रहितया बुद्ध्या धृत्या च रागद्वेषौ त्याज्यौ। विविक्तं सेवनीयम्। शरीर-वचन-मानस-निग्रह-रूपं दण्डत्रयं ग्राह्यम्। निरन्तर मात्मस्वरूपं चिन्तनीयम्। वैराग्यमेवाऽभय मित्युवित राश्रयणीया। दुःखरूपः परिग्रहः त्याज्यः। इत्थं शान्तो ज्ञाननिष्ठः चतुर्थः भक्तः ब्रह्मभवनाय समर्थो भवति। क्षेत्रज्ञपरमात्मैकत्व-ज्ञानेन स्वात्मानुभवनिश्चयरूपेण अवस्थितिः ज्ञाननिष्ठा। चरमया ब्रह्माकार-वृत्त्या अज्ञाने नष्टे ब्रह्मसाक्षात्कारः जायते।

सूक्ष्मातिसूक्ष्मस्य गुहायां स्थितस्य दुर्दर्शस्य आत्मनः दुर्विज्ञेयत्वात् आवृत्ति रसकृदुपदेशात् (४।१।१) इति ब्रह्मसूत्र मवलम्ब्य आत्मचिन्तनस्य सारं दृष्टान्तपुरःसरं पुन र्निरूप्यते।

(२०)

परं स्वं स्वं परं मत्वा मृगवन्मृगयते मृषा ।
शाखाग्रे लक्ष्यते लीनः, धीरै रभ्युपलभ्यते ।।

पदकृत्यम्

परद्वयेन अनात्मानः शरीरेन्द्रियमानसादयः निर्दिश्यन्ते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

साक्षिण आत्मनः बोधकं स्वद्वयम्। इत्थं विपरीतज्ञानस्य ज्ञापकं मत्वापदम्। साधारणमृगस्य तथा कस्तूरीमृगस्य च सूचनाय मृगवत्पदस्य सार्थकता। मरीचिकाया मर्थात् सूर्य किरणे जलभ्रान्तौ यथा मृगः जलं पिपासति पुनः कस्तूरिकामृगः स्वनाभिस्थं कस्तूरिका-गन्धं न ज्ञात्वा कतमस्य गन्ध इति तृणानि जिघ्रन् गच्छति तथा स्व मानन्दरूपं नबुद्ध्वा विषयेभ्यः सुख मिच्छति नर-पशुः इति व्यञ्जनाय मृषा मृग्यते इति पद-द्वयस्य प्रयोगः। यथा आकाशे स्थितस्य द्वितीया-चन्द्रस्य प्रदर्शनाय प्राक् वृक्षशाखाग्रं प्रदर्श्यते तत्पश्चात् उपरि आकाशे समुदितं चन्द्रमसः अंशं क्रमशः द्रष्टुं शक्नोति बालकः तथैव श्रुतिशाखाना मग्रे अर्थात् श्रेष्ठे उपनिषद्भागे आत्मा निरूप्यते इति संकेताय शाखाग्रे इति उल्लिखितम्। त्वंपदस्य वाच्यार्थः अल्पज्ञः जीवः, तत्पदस्य वाच्यार्थः सर्वज्ञ ईश्वरः कथं भवेत् इति तर्के समुपस्थिते भागत्यागलक्षणया अल्पस्य सर्वस्य च अंशस्य परित्यागे अवशिष्टस्य चैतन्यमात्रस्य एकता भवति इति लक्ष्यते पदेन सूच्यते। यथा मेघादिभिः चन्द्र आच्छाद्यते इव। तथा आत्मा पञ्चानां कोशाना मभ्यन्तरे प्रच्छन्न इव वर्तते इति लीन पदेन व्यज्यते। निर्द्वन्द्वैः धर्म्यामृतोपासकैः कुशाग्रबुद्धिभिः एव आत्मसाक्षात्कारः क्रियते इत्युपदेशाय धीरै रभ्युपलभ्यते इति पदद्वयम्।

द्र. 'ननु आवृत्तिः किमिति कर्तव्या ? अयं घट इति सकृत् उपदेशेन एव बालकः अपि घटज्ञानं कर्तुं शक्नोति चेत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आत्मा सत्, अक्षरः अद्वैतः निरञ्जनः सनातनः इत्यादि बहुशः कथिते सति पुनः आवृत्तेः का आवश्यकता ? सकृत् उपदेशेन ज्ञातुं न शक्नोति चेत् शतवारोपदेशेन अपि तादृशस्य मूढस्य ज्ञानं न भवति' इत्यादि तर्कं कुर्वन्ति केचन। किन्तु पूर्वजन्मनि एव कृताभ्यासः उत्तमाधिकारी सकृत् ब्रह्मनिष्ठस्य गुरोः वदनारविन्दात् श्रवणं कृत्वा आत्मसाक्षात्कारं कर्तुं समर्थः भवति। यथा सुकेशादयः षड् ऋषयः पिप्पलादमहर्षेः एकैकेन एव उपदेशेन साक्षात्कार–वन्तः जाताः। तादृशानां कृते आवृत्तेः आवश्यकता नास्ति। पूर्वजन्मनि अकृतोपास्तीना मत एव सप्रतिबन्धानां कृते तु आवृत्तेः परमा आवश्यकता वर्तते। आत्मचिन्तनस्य यावान् पाठः श्रद्धया क्रियते तावान् आत्मसंस्कारः जायते। आत्मसंस्कारस्य दृढीकरणाय एव आवृत्तिः उपदिष्टा। अमुकःअहमिति संस्कार मुन्मूल्य यदि सच्चिदानन्दस्वरूपः अहमिति संस्कारः समुत्पाद्यते चेत् स्वत एव मुक्तिः भवति। बहुवार-शिक्षणतः शुका अपि रामनाम उच्चरन्ति चेत् मनुष्याः कथ मात्मानं बोद्धुं न शक्नुयुः ? अतः यावत् साक्षात्कारः न भवति तावत् आत्मचिन्तनस्य अनुसन्धानं कर्तव्यम्। श्रुते अर्थे शंकायां समुपस्थितायां तन्निराकरणाय अनुकूलतर्कजनकः मानसव्यापार एव मननम्। पुनः विजातीय प्रत्यय-निराकरण–पूर्वकः सजातीयप्रत्ययप्रवाहः तैलधारावत् अविच्छिन्नः अभ्यसनीयः। छान्दोग्ये अपि 'तत्त्वमसि' महावाक्यस्य असकृद् आवृत्तिः दृश्यते। पुत्रस्य श्वेतकेतोः सर्वस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आन्तरस्य तर्कस्य समाधानं पित्रा उद्दालक मुनिना कृतम्।

अस्मिन् श्लोके पूर्वार्धेन अज्ञानिनः तथा परार्धेन जीवन्मुक्तस्य स्थितिः स्वानुभवव्यञ्जन-पुरः सरं प्रदर्श्यते।

(२१)

अस्मिन् वृहति ब्रह्माण्डे लघुरूपोऽह मीदृशः।
आत्मतत्वे च विज्ञाते लघुरूपोऽय मीदृशः॥

पदकृत्यम्

इन्द्रियप्रत्यक्षस्य दृश्यस्य चराचरस्य अवगतिः 'अस्मिन्' पदात् भवति। विशालचतुर्दशभुवनव्यञ्जनेन 'वृहति' इत्यस्य सार्थकता। सहस्रांशुसमप्रभे हैमे अण्डे ब्रह्मा जज्ञे इति भनुना उक्तस्य अण्डाकारस्य भुवनकोषस्य ग्रहणाय ब्रह्माण्ड इति। पृथिव्याः तिलादपि स्वल्पतमे प्रदेशे जातस्य शरीरे-न्द्रिय-प्राण-मनो-बुद्ध्य-हंकारादीनां संघातस्य निर्देशनाय अहंपदस्य प्रयोगः। सार्ध-हस्त-त्रयपरिमितस्य संघातस्य अतिशय-स्वल्पता-सूचनाय ईदृशः लघुरूपः इति पदद्वयम्। अत्रपर्यन्त महंताममता-पाशेन बद्धस्य अज्ञानिनः स्थितिः प्रदर्शिता। तदिति ब्रह्मणो नाम। तस्य भावः तत्त्वम्। आत्मब्रह्मणोः एकताज्ञाने जाते सति इति स्पष्टीकरणाय 'आत्मतत्त्वे च विज्ञाते' इति पदद्वयम्। विज्ञातत्वं च स्वानुभवसंयुक्ततत्वम्। कल्पितं वस्तु लघुरूपं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भवति । यतः अधिष्ठानस्य ज्ञाने सति तत् स्वत एव नश्यति । यथा अधिष्ठानस्य रज्जोः ज्ञाने सति सर्पादिकल्पना विलीयते तथा अधिष्ठानस्य आत्मनः ज्ञाने सति प्रपञ्चरूपा कल्पना प्रयासं विना विनश्यति । यथा जागरणे स्वतः स्वप्नप्रपञ्चः विनश्यति । तथा यथार्थे साक्षात्काररूपे प्रबोधे सति कल्पितः स्वप्नसदृशः जाग्रत्प्रपञ्चः स्वतः विलीयते इति जीवन्मुक्ताना मनुभवव्यञ्जनाय 'लघुरूपोऽयमीदृशः ।' इति पदानि ।

द्र. जीवन्मुक्तविषये ऋषिवरिष्ठः वसिष्ठ आदिशति, 'सुखे यस्य मुखप्रभा न उदेति तथा दुःखे न अस्त मेति । पुनः कामना-विषलतया अदूषितः यः सुषुप्तस्थः अपि जागर्ति, पुनः रागद्वेषभयादीना मनुरूपं चरतः अपि यस्य हृदय माकाशवत् निर्मलं, पुनः ध्येयस्य (विषयस्य) वासनां त्यक्त्वा यः केवलं ब्रह्मवासनां धत्ते । पुनः यस्य बाधिताऽनुवृत्तिमात्रत्वात् जगत् असत् इव भवति । पुनः यः पाणिना गृहीत मपि वस्तु अन्तर्मुख-या धिया न आददाति । पुनः यः अतीतं न स्मरति वर्तमाने न तिष्ठति भविष्यं च उपेक्षते । उदासीनवत् आसीनः यः किमपि न अभिवाञ्छति, न शोचति, न हृष्यति । पुनः असंसक्तेन चेतसा भक्तेषु भक्तसमाचारः, बालेषु बालसदृशः तथा दुःखि-तेषु दुःखित इव भवति । पुनः पूर्णचन्द्र इव शीतलः यः सर्वभूता-ना मद्वेष्टा भवति । पुनः ज्ञानाग्निना सन्देहजालिकां दग्ध्वा यः समरसः भवति । पुनः वहिः कर्म कुर्वन्नपि अन्तः किमपि न करोति । यः कदाचिदपि न दीनः भवति न च उद्धतः । पुनः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कुर्वतः अकुर्वतः वा यस्य अहंकृतः भावः नभवति। पुनः अहं चिदात्मा, अहं परात्मा अहं परात्परः निर्गुणः इति सच्चिदानन्द मात्रः यः तिष्ठति स जीवन्मुक्त उच्यते।

नमः परम ऋषिभ्यो
नमः परम ऋषिभ्यः

हरिः ओं तत् सत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपाल प्रेस
जुद्ध सडक काठमाण्डौं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal